PURANETIHASA

ACHARYA 1st YEAR
Course/Paper.4

PART – A

# अग्निपुराणम् (१-२० अध्यायाः)

## *Agnipurāṇam (1-20 adhyāyāḥ)*

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

।। ॐ विष्णवे नमः।।

## प्रथमोभागः

## अग्निपुराणम्



### मङ्गलाचरणम्

मङ्गलं भगवान् विष्णुः मङ्गलं मधुसूदनः ।
मङ्गलं पुण्डरीकाक्षः मङ्गलं गरुडध्वजः ।।
नमः कृष्णाय रामाय वसुदेवसुताय च ।
प्रद्युम्नायानिरुद्धाय सात्त्वतां पतये नमः ।।
नमस्तुभ्यं भगवते पुरुषाय महात्मने ।
भूतावासाय भूताय पराय परमात्मने ।।
मङ्गलमूर्त्तये तुभ्यं नमः मङ्गलदायिने ।
नमः विष्णवे कृष्णाय जगन्नाथाय ते नमः ।।

— o —

## आमुखम्

भारतीयवाङ्मये वेदा: सर्वप्रथमं सर्वश्रेष्ठञ्च स्थानम् अलंकुर्वन्ति । वेदान् विहाय भारतीयसभ्यताया: संस्कृतेश्चावस्थिति: सर्वथा असम्भवाऽस्ति । भारतीयसमाजे वेदानन्तरं पुराणानामेव मान्यता वर्त्तते । पुराणानि वेदानां भाष्यभूतानि सन्ति । वेदे ये मन्त्रा: सूत्ररूपेण सन्निहिता: विद्यन्ते, पुराणे ते एव मन्त्रा: मनोहरकथानकमाध्यमेन सरलसुबोध्यभाषया प्रतिपादिता: सन्ति । अत: पौराणिकज्ञानस्याभावे वैदिकसाहित्यस्यार्थावबोध: न सुकरोऽस्ति। सर्वसाधारणजनानां कल्याणाय वेदे निहितानां गूढतत्त्वानाम् आख्यानोपाख्यानगाथाकल्प-शुद्धिमाध्यमेन सुरुचिपूर्णया शैल्या विस्तारं कृतवान् पुराणतत्त्वनिपुणो भगवान् वेदव्यास: । वेदविहितार्थानां सरलसुबोध्य-भाषया जनसाधारणेषु प्रचाराय पुराणमुनि: व्यासदेव: अष्टादशपुराणानि रचयामास ।

अष्टादशपुराणेषु अग्निपुराणं विशिष्टं स्थानमर्हति । अस्य पुराणस्य वक्ता अग्नि: श्रोता च महर्षि: वसिष्ठोऽस्ति । पुराणेऽस्मिन् ईशानकल्पस्य कथा वर्णिता विद्यते । अग्निपुराणे सर्वा: विद्या: प्रवर्णिता: सन्ति । वास्तुविद्याया: वर्णनप्रसङ्गे अनेकविधमन्दिरनिर्माणं गृहादिनिर्माणं निरुपितं वर्तते । चतुर्णामुपवेदानां वेदाङ्गानां तथा दार्शनिकविषयाणाञ्च वर्णनमत्र दरीदृश्यते । सम्पूर्णं वास्तुशास्त्रम्, ज्योतिषशास्त्रम्, धर्मशास्त्रम्, राजनीतिशास्त्रम्, आयुर्वेदशास्त्रम्, अलङ्कार-छन्द:-काव्यशास्त्रञ्च अत्र सम्यक्तयोपस्थापितं विद्यते । तथा च वेदान्तशास्त्रस्य विवेचनं, गीताया: सारश्चात्र सन्निवेशितो विद्यते । वस्तुत: पुराणमिदं भारतीयविद्यानां कोश: कथ्यते । पुराणस्यानुशीलनेन प्रतीयते यत् अत्र उपयोगिनी विद्यानां संग्रहो विद्यते । जनसाधारणेषु विविधविद्यानां परिप्रचार: पुराणस्यास्य मुख्यं प्रयोजनं विद्यते । पुराणेऽस्मिन् ३८३ अध्याया: सन्निवेशिता: सन्ति । मत्स्यपुराणानुसारम् अत्र षोडशसहस्राणि श्लोका: सन्ति । पुराणस्यास्य विभिन्नेषु अध्यायेषु पुराणलक्षणानि वर्णितानि सन्ति । तथा च तन्त्र-मन्त्र-योगप्राक्रिया-दान-व्रतोपवासाभिषेक-देवताप्रतिष्ठा-वर्णाश्रमव्यवस्था-वास्तुविद्या-राजधर्म-राजनीतिविज्ञानं-युद्धविज्ञान-तिथि-वार-नक्षत्र-सामुद्रिकविज्ञान-स्त्रीपुरुषलक्षण-मृतसञ्जीवनीप्रयोग-सम्मोहनोच्चाटनादिविषय-मणिमाणिक्यादिपरीक्षौषधिप्रयोग-सर्वशास्त्र-निरूपण-चतु:षष्टिकला-साङ्गोपाङ्गनिरूपणादिविषया अत्र विवेचिता: सन्ति ।

प्रस्तुतपाठ्यक्रमे अग्निपुराणस्य ३७२ अध्यायेषु आदितः २० अध्यायाः आलोचिताः सन्ति । अतः परीक्षार्थिनां सौविध्यार्थं ते विंशतिः अध्यायाः पञ्चऽंशेषु विभाजिताः विद्यन्ते । प्रथमेऽंशे सारात्सारतत्त्वप्रसङ्गे आत्मतत्त्वं समुपस्थापितं विद्यते । ततो विद्यासारप्रसङ्गे विद्या द्विविधा प्रतिपादिता । परा अपरा च । अपरा विद्या वेदवेदाङ्गादिक्रमेण अष्टादशधा विभाजिता । पुनश्च सा तु पराविद्या कथिता यया ब्रह्माभिगम्यते । ततः अवतारवर्णनप्रसङ्गे मत्स्यावतार-कूर्मावतार-वाराहाद्यवतारः अस्मिन् अंशे चर्चिताः सन्ति ।

द्वितीयऽंशे श्रीरामावतारादारभ्य सीतान्वेषणं यावत् विषया आलोचिताः सन्ति। अग्निपुराणे भगवतः विष्णोः अवतारवर्णनप्रसङ्गे रामावतारः मार्मिकरीत्या वर्णितोऽस्ति । सरल-सुबोध्यभाषया सम्पूर्णरामायणस्य संक्षिप्तमुपस्थापनम् अग्निपुराणस्य निजस्वमहत्त्वमभिव्यनक्ति। श्रीरामावतारवर्णनप्रसङ्गे सम्पूर्णसूर्यवंशावल्याः विवरणं तथा श्रीविष्णोः चतुर्द्धा अवतरणं वर्णितमस्ति । तथा च रामस्य चरित्रचित्रणे रामलक्ष्मणयोः विश्वामित्रयागरक्षावर्णनम्, ततो मिथिलायां धनुर्भङ्गः, रामस्य सीतया साकं विवाहः तथा लक्ष्मणादीनाञ्च विवाहः वर्णितो विद्यते । अयोध्यायां रामाभिषेककाले कैकयीवचनात् पितृसत्यपालनार्थं रामस्य सीतया लक्ष्मणेन च साकं वनगमनम्, दशरथस्य स्वर्गप्राप्त्यनन्तरं वने रामेण साकं भरतमिलनम्, रामस्य पञ्चवटीगमनम्, तत्र च रावणेन सीतायाः अपहरणं संक्षिप्तरूपेण वर्णितमस्ति । ततो माल्यवन्तपर्वते हनुमतः साहाय्येन रामस्य सुग्रीवेण साकं मित्रता तथा रामेण बालिवधः समुपस्थापितों विद्यते । ततः सुग्रीवसहायतया वानरैः सीतान्वेषणं वर्णितम् । अवशेषे हनुमता लङ्कायां सीतायाः सन्धानम् अग्निपुराणे द्वितीयांशे सम्यक्तया वर्णितं विद्यते । प्रस्तुतपाठस्य तृतीयांशे रामायणसुन्दरा-काण्डस्य विषयाः चर्चिताः सन्ति । अस्मिन् अंशे मुख्यतः रामरावणयोर्मध्ये युद्धं प्रतिपादितमस्ति । युद्धे रावणस्य रामेण वधः, ततः सीतया लक्ष्मणेन च साकं श्रीरामस्य अयोध्याप्रत्यावर्त्तनं प्रस्तुतमस्ति । तदनन्तरम् अयोध्यायां रामाभिषेकस्य सुन्दरं चित्रं प्रदत्तं विद्यते । ततो रामचन्द्रस्य स्वधामगमनं वर्णितमस्ति । अस्मानंशस्यान्ते हरिवंशवर्णने यदुवंशस्य सम्पूर्णं विवरणं प्रदत्तमस्ति । प्रसङ्गेऽस्मिन् कृष्णलीला च सुचारुतया वर्णिताऽस्ति । पाठ्यक्रमस्य चतुर्थांशे अग्निपुराणवर्णितो भरतवंशः आलोचितो विद्यते । प्रसङ्गेऽस्मिन् सोमादारभ्य विचित्रवीर्यं यावत् अस्या वंशस्य विवरणं प्रदत्तं विद्यते। ततो व्यासदेवस्य पुत्राः अस्मिन् वंशे सम्मिलिता अभवन् । व्यासपुत्रस्य धृतराष्ट्रस्य दुर्योधनादयः शतपुत्राः कौरवाः तथा पण्डोः पञ्चपुत्राः पाण्डवाः अभवन् । राज्यार्थं कुरुपाण्डवानां मध्ये

युद्धमभूत् । अवशेषे कौरवा: विनष्टा: अभवन् । पाण्डवानां वंश: अग्रे चलितोऽभूत् । अस्मिन् अंशे अवतारवर्णनप्रसङ्गे बुद्धावतारस्य कल्क्यवतारस्य च वर्णनं प्रतिपादितं विद्यते। पाठ्यक्रमस्य पञ्चमअंशे अग्निपुराणस्य सर्गविषयकवर्णनं प्रदत्तमस्ति । सर्गवर्णनप्रसङ्गे कश्यपवंशवर्णनम्, स्वायम्भुववंशस्येतिवृत्तं प्राधान्येन वर्णितमस्ति । मन्वन्तरानुसारं प्रतिसर्गस्य च वर्णनं प्रदत्तमस्ति । श्रेष्ठत्वप्रतिपादनप्रसङ्गे श्रीमद्भगवद्गीताया: विभूतियोगस्य वर्णनसादृशयम् अत्र समुपलभ्यते । तथा च सर्गप्रक्रियावर्णने सर्गभेद सुष्ठुतया निरुपितो वर्तते ।

इत्थं पञ्चाऽंशेषु अग्निपुराणस्य प्रथमाध्यायात् विंशत्याध्यायं यावत् पाठ्यक्रमस्य विषया: प्रथमे भागे प्रतिपादिता: सन्ति ।

अग्निपुराणं वस्तुत: हिन्दुसभ्यताया: तथा संस्कृतेश्च ज्ञानमयकोश: कथ्यते । अत्र भारतीयानामुपयोगिनो विषया समाविष्टा: सन्ति, येषामनुशीलनेन पर्याप्तं भारतीयं ज्ञानं जायते । पुराणेऽस्मिन् पुराणपञ्चलक्षणं पञ्चसम्यक् संघटते ।

अग्निपुराणस्य समयनिरूपणे विदुषां मतपार्थक्यं दृश्यते । कियन्तो विद्वांस: अग्निपुराणस्य रचनाकालं सप्तमनवमशताब्द्यो: मध्यभाग इति स्वीकुर्वन्ति । अन्ये चेदं चतुर्थशताब्द्या: पुराणमिति अङ्गीकुर्वन्ति । पुराणस्यास्य महत्त्वं यथा अग्निपुराणे-

नास्मात् परतरं भूमौ विद्यते वस्तु दुर्लभम् ।
आग्नेये हि पुराणेऽस्मिन् सर्वा विद्या: प्रदर्शिता: ।। ३८३/५१

अग्निपुराणस्य श्रवणफलम्-

अग्निना प्रोक्तमाग्नेयं पुराणं वेदसम्मितम् ।
ब्रह्मविद्याद्वयोपेतं भुक्तिदं मुक्तिदं महत् ।।
नोपसर्गा नचानर्था न चौरादिभयं गृहे ।
तस्मिन् स्याद् यत्र चाग्नेयपुराणस्य हि पुस्तकम् ।।
आग्नेयं पठितं ध्यातं शुभं स्यात् भुक्तिमुक्तिदम् ।
अग्नये तु नमस्तस्मै येन गीतं पुराणकम् ।।

— o —

## प्रथमोऽंशः

**प्रस्तावना—**

अग्निपुराणस्यास्मिन् प्रथमांशे विष्णोरवतारकथा मुख्यतया वर्णिताऽस्ति । यद्यपि वर्णनशैली संक्षिप्ताऽस्ति तथापि अवताराणां सम्पूर्णं तत्त्वं स्पष्टतया अत्र प्रदत्तं विद्यते । 'मितञ्च सारञ्च वचो हि वाग्मिता' इयमुक्तिः अत्र प्रमाणिता अस्ति । हरेः अवताराणां सम्पूर्णविवरणम् अत्र वैज्ञानिकपद्धत्या समुपस्थापितं विद्यते । मध्ये मध्ये आत्मतत्त्वं लौकिकतत्त्वञ्च समुपस्थापितं मस्ति ।

**उद्देश्यम्—**

प्रियपाठकाः अग्निपुराणस्य प्रस्तुतपाठे वयं निम्नलिखितान् बिन्दून् आलोचयिष्यामः ।

* सारात्सारतत्त्वम् ।
* विद्यासारतत्त्वम् ।
* मत्स्यावतारः ।
* कूर्मावतारः ।
* वाराहाद्यवताराः ।

**सारात्सारतत्त्वम्—**

नैमिषे शौनकादयः ऋषयः हरेः सत्रम् आचरितवन्तः । एकदा तीर्थयात्राप्रसङ्गे सूतः तत्रागतवान् । तं दृष्ट्वा प्रहृष्टाः ऋषयः तस्य स्वागतं चक्रुः । पुनश्च ते ऋषयः सारात्सारं तत्त्वं ज्ञातुमिच्छतवन्तः । तदा सूत उक्तवान् यत् भगवान् विष्णुः सर्गादिकृद्विभुः अस्ति । स एव परात्परः सारात्सारश्च अस्ति । तमेव भगवन्तं ज्ञात्वा सर्वज्ञत्वं प्रजायते । पुरा तस्य सारात्सारस्य तत्त्वं ज्ञातुं पुरा सूतदेवो भगवतः व्यासस्य समीपं गत्वा तं नत्वा ब्रह्मसारमपृच्छत् । तदा व्यासः सुतं वसिष्ठात् प्राप्तं ब्रह्मज्ञानमकथयत् । तेनोक्तं यत् पुरा अग्निदेवः तं परात्परतत्त्वविषये एवं कथितवान् यत् मत्स्यकूर्मादिरूपधृक् भगवान् विष्णु एव परात्परः सारात्सारोऽस्ति ।

**विद्यासारतत्त्वम्—**

अग्निपुराणानुसारं द्वे विद्ये वेदितव्ये परा अपरा च । परा विद्या अष्टादशधा कथिताऽस्ति । तद्यथा–

ऋग्यजुः सामाथर्वाख्या वेदाङ्गानि च षड् द्विज ।
शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ।।
छन्दोऽभिधानं मीमांसा धर्मशास्त्रं पुराणकम् ।
न्यायवैद्यकगान्धर्वं धनुर्वेदोऽर्थशास्त्रकम् ।। (अ.पु. १/१/७)

एतासु अष्टादशविद्यासु पुराणं विद्यासारं वर्त्तते । सर्वज्ञानस्य कारणं पुराणमस्ति । पुराणलक्षणं तत्र एवं निरुपितं यत्–

सर्गस्य प्रतिसर्गस्य वंशमन्वन्तरस्य च ।
वंशानुचरितादेश्च मत्स्यकूर्मादिरूपधृक् ।।(अ.पु. १/१४)

एताः अष्टादशविद्या अपरा विद्याः । सा तु परा विद्या यया ब्रह्माभिगम्यते ।

**मत्स्यावतारकथा—**

अतीतकल्पान्ते नैमित्तिको लयोऽभूत् । भूरादिका लोकाः समुद्रोपल्पुता अभवन् । तदा भुक्तिमुक्तये वैवस्वतमनुः तपस्तेपे । एकदा कृतमालायां जलतर्पणं कुर्वतः तस्याञ्जल्युदके एकः क्षुद्रकायो मत्स्यः अभ्यपद्यत । जले क्षेप्तुकामं वैवस्वतं मस्त्यः 'मह्यं बृहत् जलस्थानं देहि' इति अवोचत् । तद्वचः श्रुत्वा अथ राजा तम् उदञ्चनेऽक्षिपत् । वृद्धिप्राप्तः स मत्स्यः मे बृहत् जलस्थानं देहीत्युवाच । मनुः तं सरोवरे प्राक्षिपत् । तत्र सरोवरप्रामाणवान् स मत्स्यः 'बृहत्स्थानं देहि' इति ऊचे । ततः स तम् अम्बुधौ प्राक्षिपत् । तत्र स क्षणमात्रेण लक्षयोजनविस्तीर्णोऽभवत् । तमद्भुतं मत्स्यं दृष्ट्वा विस्मितः मनुरब्रवीत् यत् 'को भवान् ? नूनं भवान् भगवान् विष्णुः अस्ति, किमर्थं मायया मां मोहयसि' ? मनुवचनं निशम्य मत्स्योऽब्रवीत् यत्–

सप्तमे दिवसे त्वब्धिः प्लावयिष्यति वै जगत् ।
उपस्थितायां नावि त्वं बीजादीनि विधाय च ।।
सप्तर्षिभिः परिवृत्तो निशां ब्राह्मीं चरिष्यसि ।
उपस्थितस्य मे शृङ्गे निबध्नीहिमहाहिना ।।

अस्मात् दिनात् सप्तमे दिवसे इदं जगत् जलप्लाविलं भविष्यति । बीजादीनि संगृह्य नावि तद् विधाय मम शृङ्गे नावं निवध्नीहि । सप्तर्षिभिः परिवृत्तः सन् ब्राह्मीनिशाम् अतिक्रान्तां कुरु । एवमुपदिश्य मत्स्यः अन्तर्दधे । तस्य वचनानुसारं मनुः उद्वेले तदा नावमारुदवान् । एकशृङ्गधरो नियुतयोजनः हैमो मत्स्यः स्वशृङ्गे नावम्बबन्ध । पुनश्च गतिकाले ब्रह्मदेवप्रहर्तुः हयग्रीवदानवस्य वधं तथा वेदानामुद्धरणादिकं सर्वं मत्स्यपुरणविषयं मनुः मत्स्यात् शुश्राव ।

**कूर्मावतारः—**

पुरा देवासुरयुद्धे देवाः दैत्यैः पराजिता अभवन् । दुर्वाससः शापेन ते देवाश्च श्रीहीना अभवन् । श्रीहीनाः ते सर्वे देवाः क्षीराब्धिगं विष्णुं सर्वं दुःख निवेद्य असुरेभ्यः तान् त्रातुं निवेदितवन्तः । सर्वं श्रुत्वा विष्णुः असुरैः सह सन्धिं कृत्वा अमृतार्थं ते सह क्षीरसागरमन्थयितुं देवान् अप्रेरयत् । तद्यथा—

अरयोऽपि हि सन्धेयाः सति कार्यार्थगौरवे ।
युष्मानमृतभाजो हि कारयामि न दानवान् ।।

अमृतपातेन एव देवाः श्रीसमृद्धियुक्ताः भविष्यन्ति, अन्यथा नहि । कार्यकाले शत्रुभिः सार्कं सन्धिः करणीयः । कारणं केवलं देवैः समुद्रमन्थनं न सम्भवम् । अतः तैः सार्कं मिलित्वा मन्दरं मन्थानं कृत्वा वासुकिं नेत्रं (मन्थनरज्जुम्) कृत्वा अतन्द्रिताः सन्तः समुद्रं निर्मथध्वम्' इति ।

विष्णोः वचनं श्रुत्वा देवाः दैत्यैः सह क्षीराब्धितटमागत्य तस्य मन्थनं कर्तुमुद्यता अभवन् । वासुकिपुच्छदेशे सुरा तथा मुखदेशे असुरा आतिष्ठन् । अत असुराः फणिनिश्वाससन्तप्ताः तथा सुराः हरिणाप्यायिता अभवन् । मथ्यमानेऽर्णवे निराधारोऽद्रिः जलमध्ये आविशत् । विष्णुः कूर्मरूपमास्थाय मन्दरं दधार । मथ्यमानात् क्षीराब्धेः हलाहलं समुद्भूतमभूत् । हरेण तद् विषं कण्ठे धारितम् । तेन हरः नीलकण्ठोऽभवत् । ततः समुद्रात् बारुणी देवी प्रादुर्भूता । पारिजातः, कौस्तुभः, गावः, अप्सरसः, लक्ष्मीदेवीश्चाभूवन् । स्तुवतां सर्वदेवानां सा देवी हरिणा सङ्गता अभवत् । ततो आयुर्वेदप्रवर्त्तकः धन्वन्तरिः अमृतेन पूर्णं कमण्डलुं धृत्वा सागरात् समुत्थितोऽभूत् । तत्करात् दैत्या अमृतं गृहीत्वा सुरेभ्योऽर्द्धं प्रदाय गतवन्तः । स्त्रीरूपं गृहीत्वा विष्णुः तान् अनुजगाम । रूपसम्पन्नां तां दृष्ट्वा मोहिताः दैत्याः 'हे वरानने ! अस्माकं भार्या भव, अमृतं गृहीत्वा अस्मान् पाययस्व इति ऊचुः । तथेत्युक्त्वा हरिस्तेभ्यः अमृतं गृहीत्वा सुरान् अपाययत् । चन्द्ररूपधरः राहुः छलेनामृतमपिवत् । क्रुद्धः

हरि: चक्रेण तस्य शिरोऽच्छिनत् । राहो: शिर: शरीरात् छिन्नमभूत् । भीत: राहु: हरे: शरणापन्नो बभूव, पुनश्च 'मत्त: चन्द्रार्कौ ग्रहणं प्राप्स्येते । तस्मिन् काले यद्दानं दास्यते, तदक्षयम् इति स्यादिति राहो वचनं निशम्य हरि: 'तथेति' प्राह । ततो गच्छन्तं स्त्रीरूपधरं विष्णुं दृष्ट्वा मायामोहित: हर: गौरीं त्यक्त्वा तमनुधावन् तं केशेषु धृतवान् । धावनसमये यत्र यत्र हरस्य वीर्यं स्खलितमभूत् तत्र तत्र लिङ्गानां क्षेत्रमभूत् । केशवमनुधावन् हर: इयं मायास्त्री इति ज्ञात्वा धावनात् विरतोऽभूत् । अथ अमृतमप्राप्य दैत्या: देवै: पराजिता निपातिताश्च अभवन् । ततो सुरा: त्रिदिवस्था अभवन् । य इदं कथानकं भक्त्या पठेत् सोऽपि त्रिदिवं व्रजेत् ।

**बोधप्रश्न:—**

१. मथ्यमाने अर्णवे अद्रि: कथं जलमध्ये प्रविवेश ?

२. मथ्यमानात् क्षीराब्धे: प्रथमत: किं समुद्भूतमभूत् ?

**वाराहाद्यवतारा:—**

पुरा हिरण्याक्षनामा दैत्य: देवान् जित्वा सुरेश: भूत्वा दिवि अतिष्ठत् । देवानां स्तुत्या प्रसन्नो देवेशो विष्णु: यज्ञवाराहरूपं धृत्वा दैत्यै: साकं दानवं हिरण्याक्षं जघान । ततो धर्मदेवादि-रक्षाकृत् हरि: अन्तर्दधे । हिरण्याक्षस्य भ्राता हिरण्यकशिपु: देवयज्ञभागं जित्वा सर्वदेवाधिकारं छिन्नं चकार । देवरक्षणाय हरि: नारसिंहवपु: धृत्वा सुरै: सह मिलित्वा तं जघान । पुन: सुरै: स्तुत: स नरसिंह: देवान् पदस्थान् चकार ।

**वामनावतार:—**

वामनावतारप्रसङ्गे अग्निुराणे प्रदत्तं यत्- पुरा देवासुरे युद्धे बलिप्रभृतिभि: जिता: सुरा: स्वर्गभ्रष्टा अभवन् । तत: ते हरे: शरणं गतवन्त: । तदा हरि: देवेभ्योऽभयं दत्वा अदितिकश्यपयो: पुत्ररूपेण अजायत । वामनो भूत्वा स बले: यज्ञस्थलं गतवान् । बलिद्वारं गत्वा स तत्र राजद्वारे श्रुतिम् अगृणात् । वेदान् पठन्तं तं वामनं श्रुत्वा वरदो बलि: शुक्रेण निवारितोऽपि तं वामनं 'यदिच्छसि तद् ब्रूहि, तत्तेऽहं सम्प्रदास्यामि' इत्यब्रवीत् । तदा वामन: गुर्वर्थं पदत्रयं देहि, इत्यवोचत् । ततो वामन: पदत्रयेण भूर्लोकं भुवर्लोकं स्वर्लोकञ्च अधिकृतवान् । तानि लोकानि जित्वा हरि: शक्राय स्वर्लोकं दत्तवान् । बलिञ्च सुतलं प्रेषितवान्। शक्रेण देवैश्च स्तुत: भुवनेशो वामनो हरि: सुखी अभूत् ।

**परशुरामावतारः—**

उद्धतान् क्षत्रियान् दृष्ट्वा भूभारहरणाय हरिः जमदग्नेः रेणुकायामवतीर्णोऽभूत्। तदा दत्तात्रेयप्रसादेन कार्तवीर्यार्जुनो नृपः अभवत्। एकदा सर्वोर्वीपतिः सहस्रवाहुः स कार्त्तवीर्यः मृगयां गतवान् । वने श्रान्तः स राजा मुनिना जमदग्निना निमन्त्रितोऽभूत् । कामधेनुप्रभावेन भोजितः सबलो नृपः मुनिं कामधेनुमप्रार्थयत् । यदा मुनिः तस्मै कामधेनुं दातुं नेच्छितवान् तदा स तस्य आश्रमात् धेनुमपहृतवान् । तद् ज्ञात्वा क्रुद्धः रामः युद्धे परशुना तस्य राज्ञः शिरश्छेदं कृत्वा धेनुं स्वाश्रममानयत् । अथ रामे वनं गते कार्तवीर्यस्य पुत्रैः जमदग्निः निपातितोऽभूत् । वनादागत्य पितरं निहतं दृष्ट्वा पितृनाशाभिमर्षितः रामः पृथिवीं त्रिः सप्तकृत्वः निःक्षत्रामकरोत् । कुरुक्षेत्रे पञ्चकुण्डानि कृत्वा तत्र पितृन् सन्तर्प्य काश्यपाय महीं दत्वा स पर्शुरामः महेन्द्रे पर्वते अतिष्ठत् ।

**सारांशः**

नैमिषारण्ये शौनकादय ऋषयः हरेः सत्रमाचरितवन्तः । तेषां सत्रं समाकर्ण्य सूतदेवः तत्रागतवान् । तं दृष्ट्वा प्रहृष्टाः ऋषयः तस्य स्वागतं कृत्वा तं ब्रह्मतत्त्वविषये वक्तुं कथितवन्तः । तत् श्रुत्वा सूतदेवः व्यासात् श्रुतं परब्रह्मणः विष्णोः चरित्रं श्रावयामास । विष्णोरवतारकथाप्रसङ्गे स हरेः मत्स्यरूपधारणपूर्वकं स्वायम्भुवमनोः पालनं तथा वेदोद्धरणादिकं कार्यं वर्णयामास । ततः स कूर्मावतारमवर्णयत् । देवानां श्रीवृद्धिनिमित्तं क्षीरसागरमन्थनसमये हरिः कूर्मो भूत्वा मन्दरं पर्वतं स्वपृष्ठेण धृतवान् स च हरिः यज्ञवाराहरूपं धृत्वा दैत्यं हिरण्याक्षं जघान । नारसिंहं रूपं धृत्वा हिरण्यकशिपोः वधं चकार । बलेः गर्वं दूरीकर्त्तुं तथा शक्राय स्वर्गलोकस्य प्रत्यर्पणं कर्तुं हरिः वामनवेषं धृवा बलेः द्वारं गत्वा तं छलयित्वा भूः भुवः स्वर्लोकान् स्ववशे चकार । इन्द्राय स्वर्लोकं दत्त्वा बलिं सुतलं प्रेषयामास । ततः परशुरामरूपं धृत्वा हरिः उद्धतानां क्षत्रियाणां वधं कृत्वा भुवः भारापनोदनं चकार । स्वपितृहन्तारं कार्त्तवीर्यं पुत्रैः साकममारयत् । पुनश्च स त्रिःसप्तकृत्वः पृथिवीं निःक्षत्रामकरोत् । अन्ते च समग्रं महीं कश्यपाय दत्त्वा स महेन्द्रपर्वते वासं चकार ।

***सहायकग्रन्थः***– *अग्निपुराणम्— चौखम्बासंस्कृतसंस्थानम्, वाराणसी ।*

## आदर्शप्रश्नाः

**लघुत्तरीयप्रश्नाः—**

१. सारात्सारतत्त्वम् लिखत ।

२. विद्यासारतत्त्वम् लिखत ।

३. परशुरामावतारः लिखत ।

**विश्लेषणात्मकप्रश्नाः—**

१. मत्स्यावतारकथां पठितग्रन्थदिशा प्रतिपादयत ।

२. अग्निपुराणानुसारं कूर्मावतारं निरूपयत ।

**निबन्धात्मकप्रश्नाः—**

१. वाराहाद्यावतारकथा अग्निपुराणानुसारं वर्णयत ।

२. अग्निपुराणप्रतिपादितोऽवतारतत्त्वस्य वैज्ञानिकतां प्रमाणयत ।

**एकाङ्कप्रश्नाः—**

१. नैमिषारण्ये शौनकादयः ऋषयः कस्य सत्रमाचरितवन्तः ?

२. व्यासः ब्रह्मज्ञानं कस्मात् प्राप्तवान् ?

३. द्वे विद्ये के ?

४. बीजादीनि संगृह्य मनुः कुत्र संस्थापितवान् ?

५. विष्णुः कूर्मरूपमास्थाय किं दधार ?

६. यज्ञवाराहरूपं धृत्वा विष्णुः कं जघान ?

७. सहस्रवाहुः कः ? स केन निपातितोऽभूत् ?

८. मायास्त्रीरूपं कः धृतवान् ? तमनु कोऽधावत् ?

९. मथ्यमानात् क्षीराब्धेः प्रथमतः किं समुद्भूतमभूत् ?

१०. नीलकण्ठः कः ? स कथं नीलकण्ठो बभूव ?

११. परशुरामः पञ्चकुण्डानि कुत्र निर्मितवान् ?

**उत्तराणि—**

१. विष्णोः, २. वसिष्ठात्, ३. परा अपराश्च, ४. नावि, ५. पर्वतम्, ६. हिरण्याक्षम्, ७. कार्तवीर्यः, पर्शुरामेण, ८. विष्णुः, शिवः, ९. हालाहलं विषम्, १०. शिवः, विषपानात्, ११. कुरुक्षेत्रे ।

## द्वितीयोऽंशः

**प्रस्तावना—**

पाठ्यक्रमस्यास्मिन्नंशे श्रीरामावतारादारभ्य सीतान्वेषणं यावत् विषया आलोचिताः सन्ति । अग्निपुराणे भगवतविष्णोः अवतारवर्णनप्रसङ्गे श्रीरामस्यावतारवर्णनम् अतीव मार्मिकं मनोरञ्जकञ्चास्ति । सरलसुबोध्यभाषया सम्पूर्णरामायणस्य संक्षिप्तमुपस्थापनम् अग्निपुराणस्य निजस्वमहत्त्वमभिव्यनक्ति । श्रीरामावतारप्रसङ्गे सम्पूर्णसूर्यवंशावल्याः विवरणं भगवतः श्रीविष्णो चतुर्द्धावतरणं वर्णितमस्ति । पुनश्च रामस्य चरित्रवर्णने रामलक्ष्मणयोः विश्वामित्रयागरक्षणम्, ततो मिथिलायां धनुर्भङ्गः, रामस्य सीतया सार्कं विवाहः तथा लक्ष्मणादीनाञ्च विवाहादिकं वर्णितमस्ति । अयोध्यायां रामस्याभिषेकसमये कैकयीविवादात् रामस्य वनगमनम्, दशरथस्य स्वर्गप्राप्त्यनन्तरं रामेण सार्कं भरतमिलनम्, रामस्य पञ्चवटीगमनं, पञ्चवट्यां सीतायाः रावणेनापहरणञ्चात्र प्रवर्णितमस्ति । ततो रामस्य सुग्रीवेण सार्कं मित्रता तथा रामेण बालिवधः पुनश्च सुग्रीवसहायतया वानरैः सीतान्वेषणम्, अवशेषे हनुमता लङ्कायां सीतायाः सन्धानम् अत्र प्रतिपादितमस्ति ।

**उद्देश्यम्—**

प्रियपाठकाः अस्मिन् अंशे वयम् एतान् बिन्दून् आलोचयिष्यामः ।

* श्रीरामावतारः ।
* श्रीरामवनगमनम् ।
* श्रीरामस्य चित्रकूटे वासः ।
* दशरथस्य स्वर्गारोहणम् ।
* सीताहरणम् ।
* सीताया अन्वेषणम्।
* अशोकवने सीतासन्धानम् ।

**श्रीरामावतारः (बालकाण्डम्)—**

अग्निपुराणे श्रीअग्निदेवः पुरा नारदेनोदितं रामायणं वशिष्ठम् कथितवान् । सूर्यवंशवर्णन-प्रसङ्गे नारदोऽब्रवीत् यत् विष्णुनाभिकमलात् ब्रह्मा अजायत । ब्रह्मणः सुतः मरीचिः, तस्मात् कश्यपोऽजायत । कश्यपात् सूर्यः तस्मात् वैवस्वतो मनु समभवत् । तस्मात् इक्ष्वाकुः उद्भूतोऽभूत् । इक्ष्वाकुवंशे ककुत्स्थोऽजायत । ककुत्स्थस्य पुत्रः रघुः, रघोः पुत्रः अजोऽभवत् । तस्मात् दशरथः। ततः रावणादेः वधाय स्वयं हरिः चतुर्द्धाभूत् । राज्ञो दशरथात् रामः कौशल्यायां बभूव । कैकेय्यां भरतोऽजायत । सुमित्रायाञ्च लक्ष्मणशत्रुघ्नौ अजायताम् । कालानुसारेण ते सर्वे दशरथकुमाराः बाल्यात्परं वयः प्रपेदिरे । एकदा यज्ञविघ्नविनाशाय विश्वामित्रार्थितो नृपः दशरथः मुनिना सह रामलक्ष्मणञ्च वनं प्रेरयामास । अस्त्रशस्त्रविद्यया पारङ्गमः श्रीरामः वनमध्ये ताडकां घातयामास । ततो मानवास्त्रेण मारीचं मोहयित्वा दूरमप्रेषयत् । स च बली यज्ञहन्तारं सुबाहुं सबलञ्चावधीत् । सिद्धाश्रमनिवासिविश्वामित्रादिभिः सह मैथिलस्य चापं द्रष्टुं सहानुजः रामः मिथिलां गतवान् । विश्वामित्रप्रभावतः जनकेन कथितो रामः लीलया धनुरापूरयामास, तत् बभञ्ज च । जनकः वीर्यशूल्कामयोनिजां कन्यां सीतां रामाय ददौ । पित्रादौ समायाते रामोऽपि जानकीमुपयेमे । उर्मिलां लक्षणो विवाहितवान् । जनकस्यानुजकुशध्वजसुते श्रुतकीर्त्तिं माण्डवी च शत्रुघ्नभरतावुभौ विवाहितवन्तौ । वशिष्ठाद्यैर्मुनिभिः परिवृत्तः सन् राम अयोध्याया-मागच्छन् पथि परशुरामेणावरुद्धोऽभूत् । परन्तु रामस्य पराक्रमेण परशुरामः पराभूतोऽभवत् । जामदग्न्यं विजित्य रामः भ्रातृभिः सह अयोध्यायामागतवान् ।

**बोधप्रश्नः—**

१. वैवस्वतमनुः कस्मादजायत ?

२. केन संप्रार्थितो दशरथो यज्ञरक्षार्थं रामलक्ष्मणौ वनं प्रेषयामास ।

**श्रीरामवनगमनम् (अयोध्याकाण्डम्)—**

विवाहादनन्तरं भरतो मातुलालयं गतवान् । रामः पित्रादीनभ्यपूजयत् । एकदा दशरथः राममुक्तवान्- "राघव शृणु, गुणानुरागात् प्रजाभिः मनसा त्वम् अभिषेचितोऽसि । प्रभाते अहं तुभ्यं यौवराज्यं ददामि । रात्रौ त्वं सीतया सार्द्धं संयतः सुव्रतश्च भव' । दशरथस्य

अष्टमन्त्रिगणाः (सृष्टिः, जयन्तः, विजयः, सिद्धार्थः, राष्ट्रवर्द्धनः, अशोकः, धर्मपालः, सुमन्त्रः) तथा कुलगुरु-वशिष्ठश्च नृपस्य निश्चयेन सह सम्मिलिता अभूवन् । पितुः निश्चयं ज्ञात्वा रामः तद् स्थानं त्यक्त्वा देवार्च्चनं कृत्वा कौशल्यायै सर्वं न्यवेदयत् । 'रामराज्याभिषेचने सम्भारान् सम्भवन्तु' इति वसिष्ठादीन् उक्त्वा स राजा दशरथः कैकयीसमीपं गतवान् ।

अयोध्यालंकृतिं दृष्ट्वा रामाभिषेचनं ज्ञात्वा सखी मन्थरा कैकयीं सर्वं कथितवती । पूर्वं सापराध्यतः सा पादौ गृहीत्वा रामेण कर्षिता अभवत् । तेनैव वैरेण प्रेरिता रामवनवासमभिकांक्षन्ती सा कुब्जा कैकयीं कथितवती यत्-

''कैकयी त्वं समुत्तिष्ठ रामराज्याभिषेचनम् ।
मरणं तव पुत्रस्य मम ते नात्र संशयः ।।''

कुब्जायाः रामराज्याभिषेचनं श्रुत्वा हृष्टा कैकेयी तस्यै एकमाभरणं ददौ । उक्तवती च यथा भरतः तथा राम मम सुतः । तस्याः वचनं श्रुत्वा क्रुद्धा मन्थरा हारं त्यक्त्वा कैकेयीमुक्तवती 'वालिशे, भरतमात्मानं माञ्च राघवात् रक्ष । राघवो राजा भविष्यति । तदन्ते तत्सुतः राजा भविष्यति । राजवंशः भरतात् परिहास्यते । पुरा शम्बरेण हताः सुराः दशरथस्य शरणापन्नाः अभवन् । देवासुरयुद्धे तव विद्यया सुरक्षितो दशरथो देवानां सहायो भूत्वा असुरान् पीडयामास । तदा तव साहाय्येन प्रसन्नो दशरथः तुभ्यं वरद्वयं दातुं वचनं दत्तवान् । इदानीम् उपयुक्तः समय आगतः । प्रथमवरेण रामस्य चतुर्दशवर्षाणि वनवासं द्वितीयवरेण भरताय यौवराज्यं प्रदातुं नृपं वद । कुब्जया प्रोत्साहिता अनर्थे अर्थदर्शिनी सा कैकयी क्रोधागारं प्रविवेश । राजा दशरथः द्विजादीनर्च्चयित्वा कैकेयीपुरं गत्वा रुष्टां तां दृष्ट्वा तस्या एतादृश अवस्थायाः कारणं पृष्टवान् । तद्यथा-

रोगार्त्ता किं भयोद्विग्ना किमिच्छसि करोमि तत् ।
येन रामेण हि विना न जीवामि मुहूर्त्तकम् ।।
शपामि तेन कुर्यां वै वाञ्छितं तव सुन्दरि ।
सत्यं ब्रूहीति सोवाच नृपं मह्यं ददासि चेत् ।। (अ.पु. ६.१८.२०)

दशरथस्याश्वासनं श्रुत्वा कैकेयी 'पूर्वदत्तं वर मह्यं देहीति' कथितवती । प्रथमवरेण रामः चतुर्दशसमाः संयतः सन् वने वसतु, द्वितीयवरेण एभिः सम्भारैः अद्यैव भरतं राज्ये अभिषेच्यताम् । भरताय यदि राज्यं न दास्यति तर्हि अहं विषं पीत्वा मरिष्यामि ।' तच्छ्रुत्वा नृपः भूमौ वज्राहतो वृक्ष इवापतत् । मुहूर्त्ताच्चेतनां प्राप्य कैकेयीं स राजा उक्तवान् यत्- 'हे पापनिश्चये ! रामेण तव किमहितं कृतम् ? मया वा कोऽपराधः कृतः ? यन्मामेवं त्वं

ब्रवीषि। अहं केवलं त्वत्प्रियं कृत्वा सुनिन्दितो भविष्यामि । त्वं कालरात्रीसदृशी भार्या, गते सुते मृते मयि च विधवा भूत्वा राज्यं प्रशाधि' । कैकयीम् एवमुक्त्वा राजा दशरथः राममाहूय कैकयीविवञ्चनवृत्तान्तमकथयत् । सर्वं श्रुत्वा रामः पितरं नमस्कृत्य प्रदक्षिणञ्च कृत्वा कौशल्यां नत्वा तां समाश्वास्य सलक्षणः भार्यया सीतया सार्द्धं सरथः सुमन्त्रकः वनवासाय वनं गतवान्।

**बोधप्रश्नः—**

१. दशरथस्य अष्टमन्त्रिणः के आसन् ?

२. पुरा केन देवाः पराजिता अभवन् ?

**श्रीरामस्य चित्रकूटे निवासः—**

सत्यपाशनिबद्धस्य दशरथस्य वचनपालनार्थं श्रीरामचन्द्रः लक्ष्मणेन सीतया च साकं वनगमनं कृतवान् । तमसातीरे रात्रौ उषित्वा पौरान् विहाय वनमध्ये स जगाम । प्रभाते तमपश्यन्तः पौरा अयोध्यां पुनरागतवन्तः । राजापि रुदन् कौशल्यागृहमागतवान् । सर्वे पौरजनाः स्त्रियः सर्वा राजयोषितश्च रुरुदुः । रथस्थः रामः शृङ्गवेरपुरं ययौ । गुहेन तत्र पूजितः सन् स सीतया साकं इङ्गुदीमूले अतिष्ठत् । लक्ष्मणः गुहश्च रात्रौ जागरं चक्रतुः । प्रातः तत्र सुमन्त्रं सरथं त्यक्त्वा नावि जाह्नवीमुत्तीर्य प्रयागकं प्राप्तवन्तः । तत्र मुनिं भरद्वाजं प्रणम्य चित्रकूटं गिरिं ययुः । गिरिसमीपे वास्तुपूजां कृत्वा पर्णकूटीरं रचयित्वा तत्र मन्दाकिनीतटे ते सर्वे वासं चक्रुः । राघवः सीतायै चित्रकूटं दर्शयामास । सीताया स्तनं नखैः विदारयन्तं काकं ऐषिकास्त्रं संधानं कृत्वा रामः तस्य नेत्रमाक्षिपत् । सर्वान् देवान् विहाय स काकः अन्ते रामस्य शरणापन्नो बभूव ।

**दशरथस्य स्वर्गारोहणम्—**

रामे वनं गते षष्ठेऽह्नि निशि दशरथः कौशल्यां पूर्वां कथामकथयत् यत्- कौमारे एकदा स मृगयार्थं वनं गतवान् । वने सरयूतीरे कश्चित् यज्ञदत्तकुमारकः जलनिमित्तं कुम्भं जलमध्ये प्रवेशयामास । जले कुम्भेन कृतं शब्दं श्रुत्वा भ्रमतः राजा शब्दभेदिबाणनिक्षेपं चकार । तेन वाणेन ब्राह्मणकुमारस्य निधनोऽभूत् । तस्य माता मुहुः रोदनं कृतवती । तत्पिता शोकं कृत्वा विलपन् एवं शशाप यत् ''पुत्रं विना आवां मरिष्यावः, त्वं च पुत्रशोकात् मरिष्यसि ।'' पुनश्च दशरथः उक्तवान्- ''हे कौशल्ये, पुत्रशोकात् नूनं ममापि मरणं भविष्यति'' ।

अभिशापकथामुक्त्वा 'हा राम' इत्युक्त्वा राजा दिवं गतवान् । शोकार्त्ता कौशल्या दशरथं सुप्तं मत्वा तत्रैव सुप्ता अभवत् । प्रभाते सूतमागधवन्दिनः राज्ञः यशोगानं कृतवन्तः । राज्ञः दशरथस्य मृत्युविषये ते अज्ञा आसन् । तेषां गायनं श्रुत्वा कौशल्या दशरथसमीपं गत्वा तं मृतं ज्ञात्वा 'हा हतास्मी'ति चाब्रवीत् । नरा नार्यश्च रुरुदुः । सशत्रुघ्नो भरतः मातुलगृहात् आनीतोऽभूत् । अयोध्यायामागत्य सर्वं ज्ञात्वा भरतः दुःखितः सन् कैकयीं निन्दयामास । कौशल्यां च प्रशंसितवान् । तैलद्रोणिस्थस्य पितुः शरीरस्य सरयूतटे दाहसंस्कारं कृतवान् । ततो वशिष्ठाद्यैः राज्यार्थं कथितोप्यसौ भरतः अयोध्यां शासितुं नेच्छितवान् । पुनश्च वनं गत्वा राममानेतुं स उद्यतोऽभूत् । पितुः स्वर्गगमनानन्तरं भरतः राममानेतुम् अरण्यं जगाम । भरतात् पितुः वियोगं श्रुत्वा रामः चित्रे जलं दत्त्वा भरताय पादुके दत्त्वा राज्यं शासितुं कथितवान् । रामाज्ञां गृहीत्वा भरत अयोध्यां प्रत्यावर्त्तनं चकार । परन्तु स तत्र राजा न अभवत् । जटावल्कलं धारयित्वा नन्दिग्रामे स्थितः सन् अयोध्यां पालयामास ।

**बोधप्रश्नः—**

१. केन बाणेन ब्राह्मणकुमारस्य निधनोऽभूत्?

२. सूतमागधसन्दिनः कदा राज्ञः यशोगानं कृतवन्तः ?

**(आरण्यककाण्डम्)**

**सीताहरणम् —**

वनवासकाले रामः वशिष्ठं तथा तस्य पत्नीं नत्वा अत्रिं तस्य पत्नीम् अनसूयाञ्च प्रणम्य ततो अगस्त्यभ्रातरं शरभङ्गं प्रणामं कृत । अगस्त्यप्रसादात् धनुः खड्गश्च सम्प्राप्य दण्डकारण्यमागतवान् । गोदावरीतटे जनस्थाने पञ्चवट्यां ते सर्वे वासं चक्रुः । तत्र भयङ्करी सूर्पणखा तान् भक्षयितुमागतवती । परन्तु सुरूपं रामं दृष्ट्वा सा कामिनी 'कस्त्वं' ? कस्मात्समायातः ? मम भर्त्ता भव, अहम् एतौ च भक्षयिष्यामि ।' इत्युक्त्वा भक्षयितुमुद्यतायाः तस्याः नासां कर्णौ च रामस्यादेशेन लक्ष्मणः अच्छिनत् । रक्तं क्षरन्ती सा सूर्पणखा भ्रातरं खरं गत्वा उक्तवती यत्- ''विनाशाऽहं मरिष्यामि, यदि त्वं रामलक्ष्मणौ सीतया सार्कं घातयित्वा तेषाम् उष्मं रक्तं मां पाययिष्यसि, तर्हि अहं जीवामि । खरः तथेति तामुक्त्वा चतुर्दशसहस्रैः राक्षसैः दूषणेन त्रिशिरसा च सार्कं योद्धुमगात् । रामोऽपि तैः सह युयुधे ।

शरैः स तान् राक्षसान् विव्याध । हस्त्यश्वपादातं बलं यमक्षयं निन्ये । त्रिशीर्षाणं, खरं, रौद्रं युध्यन्तं दूषणं च घातयामास । तान् मृतान् ज्ञात्वा सूर्पणखा लङ्कां गत्वा रावणाग्रे भुवि अपतत् । पुनश्च क्रुद्धा सा रावणम् उक्तवती 'त्वं न राजा न च रक्षकः, खरादिहन्तुः रामस्य भार्यां सीतां हरस्व । अहं रामलक्ष्मणयोः रक्तपानात् जीवामि, नान्यथा । तच्छ्रुत्वा रावणः तथेति उक्त्वा मारीचं स्वर्णचित्रमुगो भूत्वा सीताग्रे भ्रमणं कर्त्तुं तत्पश्चात् रामलक्ष्मणौ चाकर्षयितुम् आदेशं दत्तवान् । अन्यथा तस्य मरणं भविष्यतीति चोक्तवान् । एतत् श्रुत्वा दुःखितो मारीचः चिन्तितवान् यत् रामः श्रेष्ठधनुर्धरोऽस्ति । अत्र मम मरणं सुनिश्चितम् । अतः रावणात् न मर्तव्यम् अपि तु रामात् एव मर्त्तव्यम् । तद्यथा–

रावणादपिमर्त्तव्यं मर्त्तव्यं राघवादपि ।
अवश्यं यदि मर्त्तव्यं वरं रामो न रावणः ।। (अ.पु. ७/१५)

इति मत्वा मारीचः मृगो भूत्वा सीताग्रे मुहुः विचरणं कृतवान् । सीतया प्रेरितो रामः शरेण तमवधीत् । म्रियमाणो मृगः हासीते, हा लक्ष्मणेति प्राह । सौमित्रिः सीतायाः विरुद्धवचनं श्रुत्वा सुदुःखितः सन् रामसमीपं जगाम । तदा रावणः तत्रागत्य गृध्रं जटायुषं हत्वा सीताम् अपहृतवान् । जटायुषा भिन्नाङ्गः रावणः जानकीम् अङ्केनादाय लङ्कां गत्वा अशोकवने तामवस्थापितवान् । मम भार्या भव' इति सीताञ्च कथितवान् । तस्या रक्षानिमित्तं स राक्षसीं नियोजितवान् ।

मारीचं हत्वा रामः तत्र लक्ष्मणं दृष्ट्वा कथितवान् यत् सौमित्रे ! अयं मायामृगः, तस्य मायया मोहितः त्वमत्रागतोऽसि, तत्रापि सीतायाः अपहरणं भवेत् इति उक्त्वा लक्ष्मणेन साकं रामः पर्णकुटीरसमीपमागत्य तत्र सीतां नापश्यत् । सीतां न प्राप्य आर्त्तः रामः तत्र विलापं चकार । तस्य आर्त्तविलापं श्रुत्वा लक्ष्मणः तं बहुभावेनाश्वासितवान् । लक्ष्मणाश्वासितो रामो जानकीं मृगयामास । मार्गमध्ये जटायुः 'सीता रावणेनापहृता' इति उक्त्वा प्राणान् तत्याज । रामः तस्य दाहसंस्कारं कृतवान् । ततः स कबन्धमवधीत् । शापमुक्तः कबन्धः रामं सुग्रीवसमीपं गन्तुमब्रवीत् ।

**बोधप्रश्नः-**

१. खरः कतिराक्षसैः सह योद्धुमगात् ?

२. सीतान्वेषणकाले मार्गमध्ये जीवन्मृतः कः रामं सीतासन्देशं विज्ञापयामास ?

**(किष्किन्ध्याकाण्डं सुन्दराकाण्डञ्च)**

**सीतायाः अन्वेषणम्—**

कवन्धवाक्यानुसारतः रामः पम्पासरः गत्वा तत्र शर्वरीं शोचन्, एवातिवाहितां चकार । ततः परं दिवसे हनुमतः सहायतया सुग्रीवसमीपं जगाम । सुग्रीवस्य सम्मुखे एव स एकेन शरेण सप्ततालान् विभेद । पादेन दुन्दुभेः कायां दशयोजनं चिक्षेप । भ्रातुः वैरकारिणं बालीनं हत्वा कपिराज्यं रुमान्ताराञ्च सुग्रीवाय समर्पितवान् । ऋष्यमूके किष्किन्धेशः सुग्रीवः सीताया उद्धार-निमित्तं रामाय वचनं दत्तवान् । तच्छुत्वा माल्यवत्पृष्ठे रामः चातुर्मास्यं चकार । सुग्रीवः किष्किन्ध्यायां सुखपूर्वकं निवासं कृतवान् । ततो यदा सुग्रीवः नागतवान् तदा चिन्ताकुलः श्रीरामः लक्ष्मणं सुग्रीवसमीपं प्रेषयामास । तं दृष्ट्वा सङ्कुचितः सुग्रीवः शीघ्रं श्रीरामसमीपमागत्य सीताया अन्वेषणे वानरान् नियोजयामास । 'मासमध्ये सीतायाः अन्वेषणं कृत्वा ते वानराः आयान्तु अन्यथा तेषां मरणं सुनिश्चितमिति' सुग्रीवस्यादेशं श्रुत्वा वानराः पूर्वपश्चिमोत्तरदिश अन्विष्य जानकीमपश्यन्तः ससुग्रीवो रामसमीपं जग्मुः । ततो रामाङ्गुलीयं संगृह्य हनूमान् वानरैः सह दक्षिणदिशि मासादूर्ध्वञ्च अन्विष्य यदा जानकीं नापश्यत् तदा एवमुक्तवान् यत्-

ऊचुर्वृथामरिष्यामो जटायुर्द्धन्य एव सः ।
सीतार्थे योऽत्यजत् प्राणान्रावणेन हतो रणे ।। (अ.पु. ८/१२)

हनुमतः मुखात् जटायुवार्त्तां श्रुत्वा तस्य भ्राता सम्पातिः कपिभक्षणं विहाय रामनामश्रवणात् अर्कतापदग्धौ तस्य पक्षौ कथं भूयो संजातौ तद् वानरान् दर्शयित्वा ततो अभ्रगः सन् लङ्कायाम् अशोकवाटिकामध्ये सीतामपश्यत । शतयोजनविस्तीर्णे लवणाब्धौ त्रिकूटके लङ्कायां सीताया उपस्थितिविषये सम्पातिमुखात् श्रुत्वा हनुमदादयः वानराः ससुग्रीवं रामं सर्वं निवेदयामासुः । परन्तु शतयोजनविस्तीर्णं सागरमुत्तीर्य लङ्कां गन्तुं वानराः स्वस्यसामर्थ्यं प्रकटितवन्तः । कपीनां जीवनार्थाय रामकार्यप्रसिद्धये शतयोजनविस्तीर्णं समुद्रं स मारुतिः पुप्लुवे । सागरमध्ये

मैनाकेनाभिपूजितः मारुतिः जलमध्ये सिंहिकाराक्षसीं विनिपात्य लङ्कां प्राप्तवान् । लङ्कायां राक्षसानां गृहाणि, दशग्रीवस्य, कुम्भस्य, रक्षसः, कुम्भकर्णस्य च गृहाणि दृष्ट्वा ततो स विभीषण-स्येन्द्रजितः गृहे सीताया अन्वेषणं चकार । अन्येषां रक्षसां गृहाणि अपि अन्विष्य सीतां तत्र न दृष्ट्वा कपिपुङ्गवः चिन्तापरायणोऽभूत् । ततो अशोकवाटिकां गत्वा तत्र शिंशपावृक्षस्य तले सीतामपश्यत ।

**बोधप्रश्नः—**

१. पादेन श्रीरामः कस्य कायां दशयोजनं चिक्षेप ?

२. सम्पातिः कस्य भ्राता आसीत् ?

## सारांशः

रावणादीनां दुष्टानां वधाय भगवान् विष्णुः सूर्यवंशे दशरथात् कौशल्यायां श्रीरामरूपेणावतारं गृहीतवान् । बालावस्थायामेव स विश्वामित्रेण प्रार्थितः सन् तस्य यज्ञरक्षाछलेन ताटकाराक्षसीम् अमारयत् । मारीचराक्षसं मानवास्त्रेण मोहयित्वा दूरं चिक्षेप मिथिलां गत्वा शिवधनुः भग्नं कृत्वा सीतां विवाहितवान् । पितृसत्यपालनार्थं राज्यं त्यक्त्वा चतुर्दशवर्षाणि सीतया लक्ष्मणेन च साकं वने वासं चकार । जनस्थाने स खरदूषणादीन् दुष्टराक्षसान् अमारयत् । पञ्चवटीनिवासकाले मायामृगं दृष्ट्वा प्रलोभितायाः सीतायाः वचनेन स मृगरूपिणं मारीचं जघान । रावणः पञ्चवटीमागत्य मायया सीतां जहार । शोकाकुलः रामः हनुमतः साहाय्येन सुग्रीवेण सह मित्रतां चकार । पुनश्च बालेः वधं कृतवान् । सुग्रीवस्यादेशानुसारेण वानराः सीतान्वेषणं कृतवन्तः । तदनु सम्पातिवचनेन हनुमान् सागरमुल्लंघ्य लङ्कां गत्वा तत्र अशोकवनिकायाः शिंशपावृक्षस्याधः सीतामपश्यत् ।

## आदर्शप्रश्नाः

**लघूत्तरीयप्रश्नाः—**

१. श्रीरामस्य चित्रकूटे वासो वर्णनीयः ।

२. दशरथस्य स्वर्गारोहणं लिखत ।

३. हनुमन्तमुद्दिश्य लघुनिबन्धं लिखत ।

४. मन्थरायाः वचनानि विशदयत ।

**विश्लेषणात्मकप्रश्नाः—**

१. अग्निपुराणानुसारेण बालकाण्डं प्रतिपादयत ।

२. पठितग्रन्थदिशा आरण्यककाण्डमुपस्थापयत ।

३. श्रीरामावतरणं लिखत ।

**निबन्धात्मकप्रश्नाः—**

१. अयोध्याकाण्डानुसारेण रामस्य वनगमनं विशदयत ।

२. अग्निपुराणवर्णितं सीताहरणवृत्तान्तं लिखत ।

३. किष्किन्धाकाण्डानुसारेण सीताया अन्वेषणं समुपस्थापयत ।

**एकाङ्कप्रश्नाः—**

१. इक्ष्वाकुः कस्मादजायत ?

२. श्रुतकीर्त्तिमाण्डव्योः पती कौ ?

३. श्रीरामः पादौ गृहीतां कां कर्षितवान् ?

४. काकस्य नेत्रं रामः केनास्त्रेणाक्षिपत् ?

५. क्रोधागारे वज्राहत इव कोऽपतत् ?

६. शरयूतीरे दशरथस्य बाणेन कः निहतोऽभूत् ?

७. श्रीरामः अगस्त्यतः किं प्राप्तवान् ?

८. 'रामलक्ष्मणयो उष्णं रक्तं मां यदि पाययिष्यसि'- कस्येयमुक्तिः ?

९. श्रीरामः माल्यवत्पर्वते कतिमासा आसीत् ?

१०. रामवार्त्ताश्रवणात् कः जातपक्षोऽभवत् ?

११. लङ्का कुत्र आसीत् ?

१२. मारुतिः सीतां कुत्र अपश्यत ?

**उत्तराणि—**

१. वैवश्वतमनोः, २. शत्रुघ्नभरतौ, ३. मन्थराम्, ४. ऐषिकास्त्रेण, ५. दशरथः, ६. यज्ञदत्तकुमारकम्, ७. धनुःखड्गश्च, ८. सूर्पणखायाः, ९. चातुर्मास्यम्, १०. सम्पातिः, ११. लवणाब्दौ त्रिकूटके पर्वते, १२. लङ्काया अशोकवनिकायाः शिंशपावृक्षमूले ।

—०—

## तृतीयोऽंशः

**प्रस्तावना—**

अग्निपुराणस्य प्रस्तुतेऽस्मिन् अंशे प्रथमतः रामायणसुन्दरकाण्डस्य विषया आलोचिताः सन्ति । ततः रामरावणयोर्मध्ये युद्धं प्रतिपादितमस्ति । युद्धे रावणस्य मृत्युः ततः सीतया लक्ष्मणेन च साकं श्रीरामस्य अयोध्यागमनस्य सुन्दरं चित्रं तत्र प्रदत्तं विद्यते । अयोध्यायां रामाभिषेकानन्तरं धर्मेण तस्य राज्यपालनादिकं वर्णितं वर्त्तते । रामचन्द्रस्य स्वधामगमनं सुचारुतया वर्णितमस्ति । ततो हरिवंशवर्णने यदुवंशस्य सम्पूर्णं वर्णनं प्रदत्तमस्ति । कृष्णलीलायाः वर्णनं विशदरूपेण प्रदत्तं विद्यते । युद्धविवरणञ्चात्र वर्णितं विद्यते ।

**उद्देश्यम्—**

प्रियपाठकाः, वयम् अस्मिन् अंशे निम्नलिखितान् बिन्दून् पठिष्यामः ।

* सुन्दराकाण्डवर्णनम् ।
* रामरावणयोः युद्धम् ।
* अयोध्यायां रामाभिषेकः ।
* उत्तराकाण्डवर्णनम् ।
* हरिवंशवर्णनम् ।

**सुन्दरकाण्डम्–**

हनुमान् लङ्कायाः अशोकवनिकायां शिंशपावृक्षतले राक्षसीरक्षितां सीतामपश्यत् । तत्र मम भार्या भवेति वादिनं रावणं पुनश्च नेतिवादिनीं सीतां दृष्ट्वा हनुमान् इयमेव रामचन्द्रस्य पत्नी सीता इति निश्चितो बभूव । रावणे गते शिंशपावृक्षस्थः हनुमान् उक्तवान् यत् 'अयोध्यायां दशरथो नाम राजा आसीत् । तस्य पुत्रौ रामलक्ष्मणौ पितृसत्यपालनाय सीतया सह वनं गतवन्तौ । रामपत्नीं बलात् रावणः हृतवान् । रामः वानरसुग्रीवेण साकं मित्रतां कृत्वा त्वां मार्गयितुं मां प्रेषयत् । रामदत्तं साभिज्ञानं चाङ्गुलीयं त्वं गृहाण' । तरौ मारुतिं दृष्ट्वा सीताऽङ्गुलीयं जग्राह । भूयोऽग्रे चोपविष्टं तं हनुमन्तं सीता उक्तवती यत् 'यदि रामः जीवति, कथं मां न नयति ?' तदा मारुतिः उक्तवान्, 'सीते ! राम तव विषये न जानाति, इदानीं ज्ञात्वा

अत्रागत्य सबलं रावणं हत्वा स राम नूनं त्वां नेष्यति, हे देवी ! त्वं मा शोच । मह्यं रामाय साभिज्ञानं देहि' । तदा सीता हनुमते मणिं दत्तवती । उक्तवती च 'मां यथा रामः शीघ्रं नयेत् तथा कुरु । तथा च काकाक्षिपातनकथां कथयित्वा त्वं रामस्य शोकं दूरं कुरु' । अथ हनुमान् मणिं कथां च गृहीत्वा उक्तवान् यत् 'तव पतिः त्वाम् अवश्यं नेष्यते, अथवा तव यदित्वरा अस्ति, तर्हि हे शुभे ! मम पृष्ठमारुह । अद्य त्वां ससुग्रीवञ्च रामं दर्शयिष्यामि' । परन्तु सीता हनुमन्तम् अब्रवीत् 'मां राघवः हि नयतु' । ततो हनुमान् दशग्रीवदर्शनोपायमकरोत् । रावणस्योपवनं बभञ्ज । दन्तनखादिभिः तत्पालान् हत्वा पुनश्च सर्वान् किङ्करान् हत्वा सप्तमन्त्रिसुतान् अक्षकुमारञ्चामारयत् । तदा शक्रजित् नागपाशेन तं हनुमन्तं बबन्ध । रावणं च तं दर्शयामास । रावणः तस्य परिचयमपृच्छत् । तत् श्रुत्वा हनुमान् प्राह यत् 'अहं रामदूतः हनुमान्, त्वं राघवाय सीतां देहि, अन्यथा राक्षसैः सह त्वं रामबाणैः हतो भविष्यसि । एतत् श्रुत्वा क्रुद्धो रावणो हनुमन्तं घातयितुं यदा उद्यतोऽभूत् तदा विभीषणेन निवारितोऽभूत् । ततो रावणः तस्य लाङ्गुलं दीपयामास । दीप्तपुच्छः स मारुतिः लङ्कां दग्ध्वा सीतां दृष्ट्वा तां प्रणम्य समुद्रपारमागम्य 'मया सीता दृष्टेति' अङ्गदादीन् वानरान् कथयामास ।

ते सर्वे वानराः मधुवने मधु पीत्वा दधिमुखादींश्च दृष्ट्वा ससुग्रीवं रामं सर्वमवर्णयत् । हृष्टः रामः 'त्वया कथं सीता दृष्टा, सा च माम्प्रति किमुवाच ? कामवह्निगं मां सीताकथामृतेनैव सिञ्च । तदा हनुमान् कथितवान् यत् 'सीतां दृष्ट्वा लङ्कापुरीं दग्ध्वा अब्धिं लङ्घयित्वा अहं आगतोऽस्मि । त्वं सीतामणिं गृहाण, हे राम ! त्वं रावणं हत्वा एव सीतां प्राप्स्यसे । अतः शोचनां मा कुरु' । तं मणिं गृहीत्वा रामः विरहातुरः सन् रुरोद । तदा स सुग्रीवाद्यैः प्रबोधितोऽभूत् । ततः ते सर्वे समुद्रतीरं गतवन्तः । तत्र दुरात्मना भ्रात्रा रावणेन तिरस्कृतः विभीषणः श्रीरामस्य शरणापन्नोऽभूत् । श्रीरामः तेन सार्कं मित्रतां कृत्वा लङ्कैश्वर्ये तमभ्यषेचयत् । सेतुं बद्धुं रामः समुद्राय मार्गं प्रार्थयामास । परन्तु यदा स नायात्तदा शरैः तं भेदयितुं स उद्यतोऽभूत् । तदागत्य अब्धिः रामं प्रणम्य उक्तवान् यत् नलेन अब्धौ सेतुम् बद्ध्वा लङ्कां व्रज । पूर्वं तरुशैलाद्यैः नलकृतेन सेतुना त्वया महोदधेः पारं गतः । इदानीमपि वानरैः सह नलसेतुना गत्वा लङ्कां पश्य' । श्रीरामः समुद्रवचनानुसारेण सेतुबन्धं निर्मितवान्।

**बोधप्रश्नः—**

१. अक्षकुमारः केन निहतोऽभूत् ?

२. रावणः कथं हनुमतः लाङ्गुलं दीपयामास ?

**रामरावणयोः युद्धम्, अयोध्यायां रामाभिषेकश्च—**

श्रीरामः सेतुं बध्वा समुद्रं तीर्त्वा लङ्कामागतवान् । सीताप्रत्यर्पणनिमित्तं सः अङ्गदं दूतरूपेण रावणसमीपं प्रेषयामास । अङ्गदः तत्र गत्वा रावणं शीघ्रं रामाय सीतां दातुं रावणमुक्तवान् । अन्यथा तस्य मरणं सुनिश्चितमिति अङ्गदस्य वचनं श्रुत्वा क्रुद्धः दशाननः तमङ्गद हन्तुमुद्यतोऽभूत् । पुनश्च युद्धं विना सीतां दातुं स नाङ्गीकारं कृतवान् । युद्धाय दशग्रीवस्य संदेशं श्रुत्वा रामः कपिभिः सह लङ्कामाययौ । वानरसेनायां हनुमान् मैन्दो द्विविदो जाम्बवान् नलः नीलस्तारोङ्गदो धूम्रः सुषेणः केशरी गयः पनसो विनतो रम्भः शरभः कथनो बली गवाक्षो दधिवक्त्रः गवयो गन्धमार्दनश्चेत्यादयः वानराः प्रमुखा आसन् । एतै अन्यैः ह्यसंख्यकैः वानरैः युतः सन् सुग्रीवः रामेण साकं युद्धक्षेत्रमागतवान् । राक्षसाः वानरान् शरशक्तिशिलादिभिः जघ्नुः । वानराः राक्षसान् नखदन्तशिलादिभिः जघ्नुः । हनुमान् गिरिशृङ्गेण रिपुम् धूम्राक्षमवधीत् । अकम्पनं प्रहस्तञ्च नील आवधीत् । इन्द्रजित् नागपाशेन रामलक्ष्मेणौ बबन्ध । ताक्ष्र्यसन्दर्शनात् तौ विमुक्तौ चाभवताम् । रामः शरैः रावणं जर्जरितं चकार । रावणः दुःखितः सन् कुम्भकर्णं बोधयामास । अथ प्रबुद्धः कुम्भकर्णः मद्यस्य घटसहस्रकं पीत्वा महिषादीनां भक्षणं कृत्वा रावणम् उक्तवान् यत्- 'यतः त्वया सीताहरणसदृशं गुरुपापं कृतम्, अतो युद्धाय गच्छामि, सवानरं रामञ्च हन्मि ।' इत्युक्त्वा कुम्भकर्णः सर्वान् वानरान् ममर्द । तेन गृहीतः सुग्रीवः तस्य कर्णनासां चकर्त । कर्णनासाविहीनोऽसौ वानरान् भक्षयामास । अथ रामः सायकैः तस्य बाहू चिच्छेद । ततः पादौ छित्वा तस्य शिरः भूमौ व्यपातयत् । राक्षसेषु कुम्भो निकुम्भः मकराक्षो महोदरो महापार्श्वो मत्त-उन्मत्तराक्षसः प्रघसो भासकर्णो विरुपाक्षो देवान्तको नरान्तः त्रिशिरा अतिकायक एते राक्षसाः युद्धि रामेण लक्ष्मणेन च निपातिता अभवन् । इन्द्रजित् मायया युध्यन् रामादीन् वरदत्तैर्नागबाणैः बबन्ध । लक्ष्मणस्योपरि शक्तिभेदञ्चकार । मारुत्यानीतपर्वते विशल्यकरणी औषधिः आसीत् । तेन औषधिना लक्ष्मण जीवितोऽभूत् । निकुम्भिलायां होमादि कुर्वन्तं तम् इन्द्रजितं वीरं युद्धे लक्ष्मण अमारयत् । शोकसन्तप्तः रावणः यदा सीतां हन्तुं समुद्यतोऽभूत् तदा स अविन्ध्येन तस्मात् कार्यात् निवारितोऽभूत् । पुनश्च सबलः सरथः स युद्धाय ययौ । इन्द्रोक्त्या मातली रामं रथस्थं प्रचकार । ततो रामरावणयोर्मध्ये घोरयुद्धमभूत् । रावणो वानरान् मारुत्याद्याश्च रावणमपीडयन् ।

रामः शस्त्रैः अस्त्रैश्च रावणस्य ध्वजं रथमश्वान् सारथिञ्च चिच्छेद । ब्रह्मास्त्रेण रामो रावणस्य हृदयं भित्वा तं भूतले अपातयत् । तदा सर्वे राक्षसास्त्रियो रुरुदुः । ता आश्वास्य रावणञ्च संस्कृत्य रामाज्ञया विभीषणः हनुमता सीतामानयत् । वह्नौ प्रविष्टां शुद्धाम् इन्द्रादिभिः स्तुतां सीतां रामः गृहीतवान् । भगवतः विष्णोरवतारः राक्षसमर्दनो रामः इन्द्रमपूजयत् ।

अर्चित इन्द्र अमृतवृष्ट्या वानरान् जीवयामास । रामेण पूजिताः देवाः युद्धं दृष्ट्वा दिवं जग्मुः । हृष्टमानसो रामः पुष्पके सीतया साकं गच्छन् मार्गे सीतायै वनदुर्गाणि दर्शयामास । ततो भरद्वाजं नमस्कृत्य नन्दिग्राममागत्य भरतेन पूजितोऽभूत् । अयोध्यामागत्य वसिष्ठादीन् नमस्कृत्य कौशल्यां कैकयीं सुमित्राञ्च प्रणतोऽभूत् । अथ प्राप्तराज्यो रामो द्विजादीन् अभ्यपूजयत् । परमात्मानं वासुदेवम् अश्वमेधै अयजत् । विप्रेभ्यः सर्वदानानि ददौ । पुत्रवत् प्रजाः च पालयामास । रामराज्ये अकालमरणं नासीत् । लोकः सर्वधर्मपरो, मेदिनी च सर्वशस्या आसीत् ।

**बोधप्रश्नः—**

१. सीताप्रत्यर्पणनिमित्तं श्रीरामः दूतरूपेण कं रावणसमीपं प्रेषयामास ?

२. वानराः राक्षसान् कथं जघ्नुः ?

**उत्तरकाण्डवर्णनम्—**

राज्यस्थं राघवमभ्यर्थयितुम् अगस्त्याद्याः मुनय आगत्य तम् इन्द्रजितः रावणस्य च वधाय धन्यवादं ज्ञापयामासुः । ते ऊचुः यत् ''पुलस्त्यः ब्रह्मात्मजः आसीत् । तस्य पुत्रस्य विश्रवसः प्रथमा पत्नी पुष्पोत्कटाभूत् । तस्यां विश्रवसः पुत्रः धनेश्वरोऽभूत् । तत्पश्चात् द्वितीयपत्न्याः नैकषायः दशाननः रावणः, कुम्भकर्णः विभीषणः तथा कन्या शूर्पणखा अजायन्त । तपसा सन्तुष्टो ब्रह्मा तान् नैकषीपुत्रान् वरं दत्तवान् । ब्रह्मदत्तेन वरेण रावणः जितदैवतः, कुम्भकर्णः सनिद्रः तथा विभीषणो धर्मिष्ठोऽभूत् । रावणात् मेघनादोऽभूत् । रावणादधिको बलीं मेघनादः इन्द्रजिदभूत् । स लक्ष्मणेन निहतोऽभूत् । अनेन देवानां तथा मनुष्याणाम् अशेष-कल्याणमभवत् । इत्युक्त्वा अगत्स्याद्याः विप्राः रामेण पूजिताः सन्तः जग्मुः ।

देवादिभिः प्रार्थितो रामः शत्रुघ्नेन लवणासुरं घातयित्वा मथुरानगरीं स्थापयामास । रामेण नियोजितो भरतो निशितैः शरैः त्रिकोटिशैलूषपुत्राणां वधं चकार । सिन्धुतीरनिवासिनं दुष्टगन्धर्वं शैलूषं घातयित्वा भरतः शत्रुघ्नेन साकम् अयोध्यां गत्वा राममपूजयत् । रामः दुष्टान्निहत्य शिष्टान् सम्पाल्य धर्मेण राज्यं चकार । लोकापवादभयात् स सीतां वने तत्याज । सीता वाल्मीकेराश्रमे पुत्रौ कुशलवौ प्रसूतवती । एकादशसहस्राणि वर्षाणि राज्यं कृत्वा रामः क्रतून् कृत्वा सपौरः सानुजः स्वर्गं ययौ । सीतापुत्रः कुशः अयोध्यायां राजा बभूव ।

**बोधप्रश्नः—**

१. पुलस्त्यः कः आसीत् ?

२. शत्रुघ्नेन कः निपातितोऽभूत् ?

**हरिवंशवर्णनम्—**

विष्णोः नाभिकमलात् ब्रह्मा अजायत । ब्रह्मणोऽत्रिस्ततः सोमः । सोमात् पुरुरवाः जातः । तस्मादायुरभूत् । तस्मान्नहुषोऽतो ययातिः । ययातेः देवयान्यां यदुः तुर्वसुश्च अजायताम् । ययातेः शर्मिष्ठायां द्रुह्युः, अनुः पुरुः च अजायन्त । यदोः कुले यादवाः समुद्भूताः अभवन् । तेषां मध्ये वसुदेव उत्तमः आसीत् । भुवो भारावतारार्थं वसुदेवस्य देवक्यां षट्पुत्रा अभूवन् । सप्तमगर्भे देवक्याः जठरे बलदेव आविर्भूतो बभूव । विष्णुप्रयुक्तया योगमायया तद् गर्भः रोहिण्यां संङ्क्रामितोऽभूत् । तस्मात् बलभद्रः रौहिणेयः कथितः । देवक्याः अष्टमगर्भे स्वयं हरिः अवततार । कृष्णाष्टम्याम् अर्द्धरात्रे जातः विष्णुः देवक्या वसुदेवेन च स्तुतः सन् द्विबाहुकोऽभूत् । वसुदेवः कंसभयात् तं बालं यशोदाशयने विन्यस्य यशोदाबालिकां गृहीत्वा देवकीशयनेऽनयत् । बालऽवनिं श्रुत्वा देवक्या वारितोऽपि स कंसः तां कन्यां शिलातले चिक्षेप । कंसेन क्षिप्ता सा बालिका आकाशं गत्वा उक्तवती यत्–

किं मया क्षिप्तया कंस जातो यस्त्वां वधिस्यति ।
सर्वस्वभूतो देवानां भूभारहरणाय सः ।। (अ.पु. १२/१०)

ततः सा च देवी शुम्भादीन् हत्वा इन्द्रेण संस्तुता अभूत् । कंसोऽपि बालनाशने पूतनादींश्च प्रेषयत् । गोपे गोभिर्गोपबालकैः सह रामकृष्णौ चेरतुः । सर्वस्य जगतः पालौ तौ गोपालौ बभूवतुः । एकदा कार्यव्यग्रया यशोदया दाम्ना उलूखले बद्धः कृष्णः यमलार्जुनमध्येऽगात् । तौ वृक्षौ यमलार्जुनौ भग्नौ बभूवतुः । शैशवे कृष्णः हन्तुमुद्यतां पूतनां स्तन्यपानेन जघान ।

स्तनार्थिना कृष्णेन पादक्षेपात् च शकटः परिवृत्तोऽभूत् । वृन्दावनगतः कृष्णः कालियं जित्वा यमुनाह्रदात् तं निःसार्य अब्धिस्थञ्चकार । बलसंस्तुतः स च धेनुकगर्द्दभं हत्वा तालवनम् उपद्रवशून्यं चकार । अरिष्टवृषभं तथा हयरूपिणं केशिनं च हतवान् । शक्रोत्सवं परित्यज्य गोवर्द्धनयज्ञं कारयामास । पर्वतं धारयित्वा गोकुलं शक्रकोपात् रक्षितवान् । महेन्द्रेण संस्तुतः सन् गोविन्द इति ख्यातोऽभूत् । तुष्टेन कृष्णेन भूय इन्द्रोत्सवः कारितः । कंसप्रेरितेनाक्रूरेण संस्तुतः कृष्णः रामेण सह रथस्थः सन् मथुराञ्चागात् । अप्रयच्छन्तं रजकं हत्वा स वस्त्राणि चागृहीत् । रामेण सह मालाभूषितः कृष्णः मालाकाराय वरं ददौ । दत्तानुलेपनां कुब्जामृजुं चक्रे । द्वारिस्थितं मत्तं कुवलयापीडं हत्वा रङ्गं प्रविश्य रामकृष्णौ मुष्टिकचाणूरौ जघ्नतुः । अपरे मल्लाश्च ताभ्यां हताः अभवन् । मथुराधिपतिं कंसं हत्वा तत्पितरं कृष्णः मथुराधिपतिं चक्रे । ततो जामातरि हते जरासन्धः मथुरारोधं कृत्वा यादवैः साकं युयुधे । रामकृष्णौ मथुरां त्यक्त्वा गोमन्तमागतवन्तौ । तौ जरासन्धं विजित्य पौड्रकं वासुदेवकं च जितवन्तौ । द्वारकापुरीं निर्माय यादवैर्वृत्तः सन् कृष्णः तत्र न्यवसत् । भौमं नरकं हत्वा तेनानीताः षोडशसहस्रकन्यकाः स उवाह । रुक्मिण्यादयः कृष्णस्य अष्टपट्टमहिष्यः अभवन् । इन्द्रं जित्वा पारिजातं समानीय श्रीकृष्णः सत्यभामायाः गृहोद्याने अस्थापयत् । सान्दीपनेः शस्त्रास्त्रविद्यां ज्ञात्वा, पञ्चजनं जित्वा यमेन सुपूजितः सन् तस्मै गुरवे गुरुदक्षिणारूपेण तदपहृतं बालकं दत्तवान् । कालयवनं घातयित्वा मुचुकुन्देन पूजितोऽभूत् । वसुदेवं देवकीं भक्तविप्राञ्च सोर्च्चयत् । रेवत्यां बलभद्राच्च निशठोल्मुकौ अभवताम् । कृष्णात् रुक्मिण्यां प्रद्युम्नोऽभूत् । षष्ठेऽह्नि स च प्रद्युम्नः शम्बरेण बलात् हृतोऽभूत् । शम्बरेणाम्बुधौ निक्षिप्तं तं बालं मत्स्यो जग्राह। तं मत्स्यं धीवरः गृहीत्वा शम्बराय अददात् । शम्बरः तं मत्स्यं मायावत्यै न्यवेदयत् । मत्स्यमध्ये स्वं पतिं दृष्ट्वा तं सा आदरात् पुपोष । कालान्तरे तं प्रद्युम्नं सा मायावती 'अहं तव पूर्वभार्या रतिः' इति स्वपरिचयं दत्तवती । तच्छ्रुत्वा प्रद्युम्नः शम्बरं हत्वा पत्न्या मायावत्या साकं द्वारकामाययौ । प्रद्युम्नस्य पुत्रः अनिरुद्धः । तत् पुत्रः वज्रः तथा वज्रस्य पुत्रः मार्कण्डेयोऽभूत्। मार्कण्डेयात् सर्वविदभूत् ।

**बोधप्रश्नः—**

१. अत्रेः पुत्रः कः ?

२. अनिरुद्धात् कोऽजायत ?

## सारांशः

अग्निपुराणे सुन्दरकाण्डे मुख्यतः हनुमतः सीतान्वेषणं वर्णितमस्ति । समुद्रं लंघयित्वा मारुतिः लङ्कां गतवान् । तत्र अशोकवनिकायां शिंशपावृक्षतले स जानकीमपश्यत् । सूर्यवंशस्य यशोगानेन आकृष्टा सीता तस्य परिचयं ज्ञात्वा रामाङ्गुलीयं गृहीत्वा अभिज्ञानरूपेण स्वमस्तकमणिं तस्मै दत्तवती । अथ हनुमान् अशोकवनिकां ध्वंसं कृत्वा अक्षयकुमारं तथा अन्यान् राक्षसान् हत्वा इन्द्रजिता बद्धः सन् रावणसमीपं गत्वा रामाय सीतां दातुं तं कथयामास । क्रुद्धो रावणः तस्य लाङ्गुले अग्निं संयोजयामास । तेन दीप्तलाङ्गुलेन मारुतिः लङ्कां दग्ध्वा समुद्रमुत्तीर्य रामसमीप-मागत्य सीतासंदेशं मस्तकमणिं च तस्मै दत्तवान् । श्रीरामः नलकृतेन सेतुना समुद्रपारं गत्वा युद्धे सबलं राक्षसं रावणममारयत् । लङ्कायां विभीषणम् अभिषिच्य स सीताया लक्ष्मणेन च साकं पुष्पकविमानेन अयोध्यामागतवान् । तत्र एकादशसहस्राणि वर्षाणि धर्मेण राज्यं कृत्वा राज्ये कुशमभिषिच्य सपौरः सानुजः स्वर्गं गतवान् ।

तथा च हरिवंशवर्णनप्रसङ्गे अग्निपुराणे यदुवंशस्य सम्पूर्णं विवरणं प्रदत्तमस्ति । भुवो भारावताराय देवक्यां वसुदेवतः रामकृष्णौ अजायताम् । बाल्ये श्रीकृष्णः पूतनां शकटं तृणावर्त्तराक्षसं च हतवान् । गोकुले तौ जगत्पालौ गोपालौ बभूवतुः । यमुनाह्रदात् कृष्णः कालियं निःसारितवान् । अरिष्टं केशिनं च हत्वा गोपं निरुपद्रवं चकार । इन्द्रोत्सवं वारयित्वा गोवर्द्धनोत्सवं चकार । अक्रूररथेन मथुरां गत्वा रजकं गजं च निहतवान् । अष्टमल्लैः सह कंसं जघान । गुरवे हृतपुत्रं दत्वा द्वारकानगरीं स्थापितवान् । कालयवनं घातयित्वा प्रौड्रकं वासुदेवकं नरकं च हत्वा षोडशसहस्रकन्यानां पाणिग्रहणं चकार । इन्द्रं जित्वा पारिजातवृक्षमानीय सत्यभामायाः गृहे स्थापितवान् । रुक्मिण्यां प्रद्युम्नः तस्य प्रथमपुत्रोऽभूत् । प्रद्युम्नपुत्रोऽनिरुद्धः वाणासुरकन्यामुषामुपयेमे । उषाऽनिरुद्धयोः पुत्रः वज्रोऽभूत् ।

## आदर्शप्रश्नाः

**लघूत्तरीयाः प्रश्नाः—**

१. सुन्दराकाण्डस्य सारांशं लिखत ।

२. राज्यार्थं दुर्योधनस्य चक्रान्तं लिखत ।

३. पुलस्त्यवंशं प्रकाशयत ।

४. प्रद्युम्नोपाख्यानं लिखत ।

**विश्लेषणात्मकाः प्रश्नाः—**

१. अग्निपुराणस्य सुन्दराकाण्डानुसारेण हनुमतः सीतान्वेषणं लिखत ।

२. अग्निपुराणानुसारेण हरिवंशं विशदयत ।

३. पठितग्रन्थानुसारेण कंसबधं वर्णयत ।

**निबन्धात्मकाः प्रश्नाः—**

१. अग्निपुराणे रामायणस्य महत्त्वं निरूपयत ।

२. रामरावणयोः युद्धं रामाभिषेकञ्च विशदयत ।

३. अग्निपुराणे प्रदत्तां कृष्णलीलां प्रकाशयत ।

**एकाङ्कप्रश्नाः—**

१. शतयोजनविस्तीर्णे लवणाब्धौ त्रिकूटके का अस्ति ?

२. गिरिशृङ्गेण कः धूम्राक्षमवधीत् ?

३. अकम्पनं प्रहष्टं च कोऽवधीत् ?

४. रामरावणयोर्युद्धे रामं रथस्थं कः प्रचकार ?

५. कदा सर्वधर्मपरो लोकः सर्वशस्या च मेदिनी आसीत् ?

६. देवक्या अष्टमगर्भे कोऽजायत ?

७. योगमाया कस्या गर्भादजायत ?

८. अत्रिः कस्य पुत्रः ?

९. सोमस्य पुत्रः कः ?

१०. आयुः कस्य पिता ?

११. नहुषस्य पुत्रः कः ?

१२. रोहिणी कस्य माता ?

**उत्तराणि—**

१. लङ्का, २. हनुमान्, ३. नीलः, ४. मातली, ५. रामराज्ये, ६. श्रीकृष्णः, ७. यशोदायाः गर्भात्, ८. ब्रह्मणः, ९. बुधः, १०. नहुषस्य, ११. ययाति, १२. बलदेवस्य ।

— ० —

## चतुर्थोऽंशः

**प्रस्तावना—**

अग्निपुराणे भरतवंशस्य सुस्पष्टं वर्णनं समुपलभ्यते । सोमादारभ्य विचित्रवीर्यं यावत् अयं वंशः प्रचलितोऽभूत् । ततो व्यासदेवस्य पुत्राः अस्मिन् वंशे सम्मिलिताः अभवन् । व्यासपुत्रस्य धृतराष्ट्रस्य शतपुत्राः, पण्डोः पञ्चपुत्राश्चासन् । राज्यार्थं कौरवपाण्डवानां मध्ये युद्धमभूत् । अवशेषे दुष्टाः कौरवाः विनष्टा अभवन् । पाण्डवानां वंश अग्रे चालितोऽभूत् ।

अग्निपुराणे अवतारवर्णनप्रसङ्गे दश अवताराः सम्यक्तया चर्च्चिताः सन्ति । प्रसङ्गेऽस्मिन् बुद्धावतारस्य परिकल्पना पुराणस्यास्य निजस्वं वैशिष्ट्यं विद्यते । कल्केः अवतारस्य सम्भावना पुराणस्यास्य भविष्यचिन्तनं स्पष्टमभिव्यञ्जयति ।

**उद्देश्यम्—**

प्रिय पाठकाः, अस्मिन् अंशे वयम् प्रचलितपाठ्यविषयस्येतान् बिन्दून् आलोचयिष्यामः ।

* अनिरुद्धोपाख्यानम् ।
* भरतवंशम् ।
* राज्यार्थं दुर्योधनस्य चक्रान्तः ।
* कुरुपाण्डवयोः युद्धोद्योगः ।
* महाभारतसंग्रामः ।
* महाप्रस्थानम् ।
* बुद्धावतारः ।
* कल्क्यवतारः ।
* सारांशः ।

**अनिरुद्धोपाख्यानम्—**

कृष्णपुत्रप्रद्युम्नात् अनिरुद्धोऽभूत् । तस्य बाणकन्यया उषया साकं परिणयोऽभूत् । अस्मिन् विषये हरिवंशे एकमुपाख्यानं वर्त्तते । यत् बलिसुतः बाणासुरः शोणितपुरस्य राजा आसीत् । तस्य तपसा प्रीतः शिवः तं पुत्ररूपेण स्वीचकार । 'यदा तव मयूरध्वजः पातितः

भविष्यति तदा त्वं युद्धं प्राप्स्यसि' इति उक्त्वा शिवोऽन्तर्दधे । उषा बाणासुरस्य कन्या आसीत् । एकदा शिवेन क्रीडन्तीं गौरीं दृष्ट्वा सा पतौ सस्पृहा अभवत् । गौरी तामुक्तवती यत् 'शयनकाले स्वप्ने यस्य पुरुषस्य दर्शनं प्राप्स्यसि स एव तव भर्ता भविष्यति ।' गौर्य्युक्त्या हर्षिता उषा वैशाखमासद्वादश्यां रात्रौ स्वप्ने अनिरुद्धमपश्यत् । तस्या: सखी चित्रलेखा चित्रकर्मविशारदा आसीत् । उषया: स्वप्नदृष्टपुरुषस्याकृतिं सा चित्रपटे अङ्कीतवती । तेन चित्रपटसाहाय्येन सा अनिरुद्धमानीतवती । बाणमन्त्रिण: कुम्भाण्डस्य दुहिताया: चित्रलेखाया: साहाय्येन उषा स्वपतिं प्राप्तवती । अनिरुद्धोऽपि उषां प्राप्य हृष्ट: सन् तया सह रराम । बाणासुरस्य मयूरध्वजो निपतितोऽभूत् । रक्षिभि: निवेदित: बाण: अनिरुद्धेन सार्कं युद्धं चकार । नारदमुखात् सर्वं ज्ञात्वा कृष्णो बलभद्रेण प्रद्युम्नेन च समं गरुडमारुह्य शोणितपुरं जगाम । तत्र हरिशङ्करयो: मध्ये घोरयुद्धमभूत् । जृम्भणास्त्रेण शिवं पीडयित्वा कृष्ण: बाणस्य सहस्रान् बाहूनच्छिनत् । शिव: बाणाय अभयवरं दत्तवान् । अत: तं मानयित्वा कृष्ण: बाणं न अमारयत् । पुनश्च स शिवेन सार्कं स्वस्याभेदं प्रदर्श्य उषया साकमनिरुद्धस्य विवाहं कारयामास । शिवाद्यै: पूजितो विष्णु: उषया अनिरुद्धेन च सह द्वारकां जगाम ।

**बोधप्रश्न:—**

१. चित्रलेखा कस्य कन्या आसीत् ?

२. उषा कदा स्वप्ने अनिरुद्धमपश्यत् ?

**भरतवंशम्—**

विष्णो: नाभिकमलात् ब्रह्मा संबभूव । ब्रह्मपुत्रोऽभूत् अत्रि: । अत्रे: पुत्र: सोम: । सोमाद् बुधोऽजायत् । बुधात् ऐल: पुरुरवा: । तस्मादायुस्ततो राजा नहुषोऽभूत् । नहुषात् ययातिक: । ययाते: पुरु: । पुरुवंशे भरतोऽभूत् । अथ कुरु: नृपोऽभूत् । तद्वंशे शान्तनु: अभवत् । तस्मात् गङ्गासुत: भीष्मोऽभूत् । शान्तनो: सत्यवत्यां चित्राङ्गदो विचित्रवीर्यश्च अजायताम् । स्वर्गं गते शान्तनौ भार्याविवर्जितो भीष्मो भ्रातृराज्यमपालयत् । चित्राङ्गदो बालावस्थायां हतोऽभूत् । काशिराजस्य द्वे कन्ये अम्बिका अम्बालिका च विजितारिणा भीष्मेण आनीते अभूताम् । ते द्वे विचित्रवीर्यस्य भार्येऽभवताम् । यक्ष्मणाग्रस्त: विचित्रवीर्य: दिवं गतवान् । सत्यवत्या अनुमतात् अम्बिकाया: धृतराष्ट्र: तथा अम्बालिकाया: पण्डु:

व्यासात् अजायताम् । गान्धार्यां धृतराष्ट्रान् दुर्योधनप्रमुखाः शतपुत्रा अजायन्त । ऋषिशापात् पण्डोः भार्यायोगात् मृत्युः निर्द्धारित आसीत् । अतः धर्मात् कुन्त्यां युधिष्ठिरः वाताद्भीमो शक्रात् अर्जुनः पण्डोः अभूत् । पुनश्च अश्विनीकुमारतः माद्र्याः नकुलोऽजायत । माद्रीयुतः पण्डुः मृतोऽभूत् । माद्र्याः सहदेवोऽजायत । कन्यावस्थायां कुन्त्यां कर्णः जातोऽभूत् । स च दुर्योधनाश्रितोऽभूत् । राज्यार्थं कुरुपाण्डवयोः मध्ये महभारतसंग्रामो बभूव । कौरवाणां वंशनाशोऽभूत् । अर्जुनस्य पौत्रः परीक्षिद् केवलं कृष्णकृपया जीवितो भूत्वा अग्रे राज्यशासनं चकार । परीक्षितः जन्मेजयादय चत्वारः पुत्रा आसन् ।

**बोधप्रश्नः—**

१. अम्बालिका कस्य माता ?

२. पण्डोः पुत्र कः ?

**राज्यार्थं दुर्योधनस्य चक्रान्तः—**

दैवयोगात् कुरुपाण्डवयोः वैरं बभूव । कुधीः दुर्योधने जतुगृहे पाण्डवान् अदहत् । दग्धागारात् विनिष्क्रान्ताः पाण्डवाः मात्रा सह एकचक्रायां मुनिवेशं धृत्वा ब्राह्मणस्य निवेशने अतिष्ठन् । ततो वकराक्षसं निहत्य ते सर्वे पाञ्चालविषयं गतवन्तः । तत्र द्रौपद्याः स्वायंवरे बाहुभेदेन जित्वा अर्जुनः द्रौपदीं प्राप्तवान् । अनन्तरं द्रौपदी पञ्चपाण्डवैः साकं विवाहं कृतवती । ततः दुर्योधनादिभिः ज्ञाताः ते अर्द्धराज्यं प्राप्तवन्तः । अर्जुनः पावकात् उत्तमं रथं दिव्यं च गाण्डीवं धनुः प्राप्तवान् । द्रोणात् सर्वे कौरव-पाण्डवाः पूर्वं शस्त्रविद्यां प्राप्तवन्तः । परन्तु अर्जुनः द्रोणात् ब्रह्मास्त्रशिक्षामलभत । कृष्णेन सह अर्जुनः अग्नये खाण्डववनं समर्पितवान् । अतः प्रसन्नोऽग्निः तस्मै दिव्यास्त्रं च दत्तवान् ।

**कुरुपाण्डवयोः युद्धोद्योगः—**

अर्जुनस्य भुजबलेन पाण्डवाः दिग्विजयं कृतवन्तः । युधिष्ठिरः राज्यं शासयित्वा तदा राजसूययज्ञे बहुस्वर्णं ददौ । एतद् दृष्ट्वा ईर्षान्वितो दुर्योधनः द्युतकार्ये शकुनिं नियोज्य युधिष्ठिरमजयत् । तस्य युधिष्ठिरस्य राज्यं जित्वा सभामध्ये तेषाम् अपमानं कृत्वा राज्यात् पाण्डवान् बहिष्कृतवान् । भ्रातृभिः द्रौपद्या च साकं युधिष्ठिरः वने द्वादशवर्षाणि कालमनयत् । तत्र च अष्टाशीति-सहस्राणि ब्राह्मणान् पूर्ववत् अभोजयत् । ततस्ते विराटराज्यम् अविज्ञाता

जग्मु: । विराटसमीपे युधिष्ठिर: कङ्को द्विजो, भीम: सूपकृत् अर्जुन: बृहन्नला, द्रौपदी सैरन्ध्री तथा यमजौ अन्यनाम्ना तत्र निवासं चक्रु: । भीमसेन: निशि कीचकञ्चाबधीत् । द्रौपदीं तथा गोग्राहादीं हर्तुकामान् कुरुन् अर्जुनोऽजयत् । कृष्णभगिनीसुभद्राया: पुत्र: अभिमन्यु: विराटपुत्रीम् उत्तरां विवाहितवान् । धर्मराज: युधिष्ठिर: सप्ताक्षौहिणीश: आसीत् । दुर्योधनश्च एकादशाक्षौहिणीश: आसीत् । वनवासानन्तरं तेभ्य: पाण्डवेभ्य अर्द्धराज्यम् अथवा पञ्चग्रामान् दातुं श्रीकृष्ण: दूतरूपेण दूर्योधनसमीपं जगाम । परन्तु युद्धं विना भूसूच्यग्रं दातुं स नाङ्गीकारं चकार । सभामध्ये विश्वरूपं दर्शयित्वा श्रीकृष्ण: विदुरार्चित: सन् युधिष्ठिरसमीपं गत्वा दुर्योधनेन सह योद्धुं कथयामास ।

**कुरुपाण्डवसंग्रामवर्णनम्—**

"विनायुद्धं भूसूच्यग्रं न दास्यामि" इति दुर्योधनवचनं श्रुत्वा श्रीकृष्ण: युद्धोद्यमं कर्त्तुं युधिष्ठिरं प्रेरयामास । ततो यौधिष्ठिरी दौर्योधनी च सेना कुरुक्षेत्रं ययौ । तत्र भीष्मद्रोणादिकान् दृष्ट्वा गुरुनिति मत्वा अर्जुनो नायुध्यत । तदा श्रीकृष्ण: भीष्ममुख्यका: अशोच्या: सन्तीति हेतो: तेषां कृते शोचनां न कर्त्तुं कथितवान् । स उक्तवान् यत् 'शरीराणि विनाशीनि सन्ति, परन्तु शरीरी न विनश्यति । अयम् आत्मा परं ब्रह्म । 'अहं ब्रह्मास्मि' इति तं विद्धि । सिद्धिमसिद्धिं समानरूपेण य: पश्यति स एव योगी कथ्यते । त्वं राजधर्मं प्रपालय । राजधर्मानुसारेण युद्धमेव क्षत्रियस्य परमो धर्म:' । एवं श्रीकृष्णेन प्रबोधित: सन् अर्जुन: युद्धाय उद्यतोऽभूत् । आदौ दुर्योधनस्य सेनाया: सेनापति: भीष्मोऽभूत् । पाण्डवानां सेनापति: शिखण्डी चाभूत् । तयो: मध्ये युद्धं बभूव । सभीष्मका: धार्तराष्ट्रा: पाण्डवान् जघ्नु: । शिखण्डाद्या: पाण्डवा: धार्तराष्ट्रान् युद्धे जघ्नु: । कुरुपाण्डवसेनयो: युद्धं देवासुरयुद्धसममभूत् । भीष्मास्त्रै: प्रत्यहं दश-अक्षौहिणीसैन्या: विनष्टा: अभवन् । युद्धस्य दशमदिवसे द्रुपदवचनेन शिखणडी जलदो यथा बाणान् ववर्ष । युद्धमार्गं प्रदर्श्य भीष्म: स्वेच्छामृत्युं गृहीतवान् । शरशय्यागत: भीष्म: उत्तरायणे विष्णुं स्तुवन् वसुलोकं गतवान् । ततो युद्धे द्रोण: सेनापतिरभूत् । धृष्टद्युम्न: पाण्डवानां सेनापतिरभूत् । तयोर्मध्ये घोरयुद्धं बभूव । काल इव द्रोण: धृष्टद्युम्नस्य सैन्यान्यपातयत् । 'हतोऽश्वत्थामा' इत्युक्ते युधिष्ठिरे द्रोण: शस्त्राणि चात्यजत् । धृष्टद्युम्नशराक्रान्त: स भूतले पतितोऽभूत् । ततो युद्धस्य पञ्चदशदिवसे कर्ण: सेनापति: बभूव । स च अर्जुनेन निपातितो बभूव । शल्यो दिनार्द्धं युयुद्धे । तं युधिष्ठिरोऽवधीत् । भीमसेन: गदया दुर्योधनस्य सर्वान् अनुजान् नाशयामास । अवशेषे दुर्योधनं च हतवान् । अक्षौहिणीप्रमाणं बलयुक्तम्

अश्वत्स्थामा निशि द्रोपदेयान् सपाञ्चालान् धृष्टद्युम्नञ्च सोऽवधीत् । पुत्रहीना द्रौपदी भृशं रुरोद । तदा अर्जुनः ऐषिकास्त्रेण तस्य शिरोमणिं जहार । अश्वत्थामास्त्रनिर्दग्धम् उत्तरागर्भं हरिः जीवयामास । उत्तरागर्भात् परीक्षिदभूत् । महाभारत-संग्रामात् दुर्योधनपक्षीयाः कृतवर्मा कृपः द्रौणिः एते त्रयो मुक्ता अभवन् । युधिष्ठिरसेनायाः पाण्डवाः, सात्यकिः कृष्ण एते सप्त मुक्ता अभवन् न चापरे । आर्त्ताः स्त्रियः समाश्वास्य प्रहतान् वीरान् संस्कृत्य तान् च तर्पयित्वा युधिष्ठिरः भीष्मोपदेशं गृहीत्वा राज्यशासनं चकार । अश्वमेधे स ब्राह्मणेभ्यो बहुदानं दत्तवान् । अर्जुनात् मौषलेयं यादवानाञ्च संङ्क्षयं श्रुत्वा राज्ये परीक्षितं स्थापयित्वा सानुजः सस्त्रीको युधिष्ठिरः स्वर्गं प्राप्तवान् ।

**बोधप्रश्नाः—**

१. किं न विनश्यति ?

२. कः वसुलोकं गतवान् ?

३. द्रोणं कः घातितवान् ?

**महाप्रयाणम्—**

युधिष्ठिरस्य हस्तिनाराज्ये अभिषेकानन्तरं धृतराष्ट्रः गान्धारी पृथा च वनगमात् । तैः साकं वनं गतः विदुरः वनाग्निना दग्धोऽभूत् । एवं विष्णुः भुवः भारमहरत् । अधर्मनाशाय धर्मसंस्थापनार्थाय पाण्डवान् निमित्तीकृत्य स महाभारतव्याजेन दुष्टराजानां संहारं कृतवान् । पुनश्च विप्रशापव्याजेन मदान्धानां यादवानां संहारं चकार । वज्रं राज्ये अभिषिच्य देवादेशात् प्रभासे देहं त्यक्त्वा स्वयं हरिः स्वधाम गतवान् । इन्द्रलोके ब्रह्मलोके पूजितः योगीध्येयः श्रीकृष्णः अविनाशी आसीत् । तस्य महाप्रयाणानन्तरं द्वारकास्थानं सागरः प्लावयामास यादवान् संस्कृत्य पार्थः तेषां कृते उदकधनादिकं दत्तवान् । अष्टावक्रशापेन विष्णोः याः भार्याः तत्र अतिष्ठन्, लगुडायुधैः गोपालैः ताः नीताः अभूवन् । शोकाकुलः पार्थः व्यासेनाश्वासितः सन् हस्तिनापुरमागत्य युधिष्ठिरं सर्वं वृत्तं कथयामास । तच्छ्रुत्वा धर्मराजः परीक्षितं राज्ये स्थाप्य द्रौपद्या भ्रातृभिश्च सह संसाराऽनित्यतां ज्ञात्वा हरिं जपन् महाप्रस्थाने गतवान् । महापथे द्रौपदी सहदेवश्च निपतितौ अभवताम् । ततो नकुलः फाल्गुनः भीमश्च निपतिता अभवन् ।

शोकपरायणः युधिष्ठिर इन्द्रानीतरथारूढः सन् सानुजः स्वर्गमाप्तवान् । तत्र दुर्योधनादीन् दृष्ट्वा स हर्षितोऽभूत् ।

**बुद्धावतारः—**

पुरा देवासुरे युद्धे दैत्यैर्देवाः पराजिताः अभवन् । ततो ते रक्षरक्षेति वदन्त ईश्वरसमीपं जग्मुः । तानाश्वास्य ततो हरिः मायामोहस्वरूपः शुद्धोदनसुतो भूत्वा तान् दैत्यान् मोहयामास। वेदपराङ्मुखाः ते दैत्याः बौद्धाः बभूवुः । पश्चात् च स अर्हतोऽभूत् । तान् च अर्हतान् चकार । एवं वेदधर्मविवर्जिताः ते दैत्याः पाषाण्डिनो जाताः । ते नारकार्हं कर्म चक्रुः । ते सर्वे कलियुगान्ते वर्णसङ्कराः शीलहीनाः दस्यवश्च भविष्यन्ति । वाजसनेयकः वेदः पञ्चदशशाखाप्रमाणेन विभक्तो भविष्यति ।

**कल्क्यवतारः—**

कलौ जनाः धर्मकञ्चुकसंवीता तथा अधर्मरुचयो भविष्यन्ति । पार्थिवरूपिणः ते म्लेच्छाः मानुषान् भक्षयिष्यन्ति । तदा विष्णुयशसः पुत्रो याज्ञवल्क्यपुरोहितः कल्किः अस्त्रं गृहीत्वा म्लेच्छान् उत्सादयिष्यति । चातुर्वर्ण्ये च यथोचितां मर्यादां स्थापयिष्यति । सर्वेषु आश्रमेषु प्रजाः सद्धर्मं चरिष्यन्ति । ततो हरिः कल्किरूपं परित्यज्य स्वरूपमास्थाय स्वर्गं गमिष्यति । ततः कृतयुगः पुरावत् सम्भविष्यति । वर्णाश्रमाश्च स्वेषु धर्मेषु स्थास्यन्ति । एवं सर्वेषु कल्पेषु सर्वमन्वन्तरेषु च अतीतानागतादयः असंख्याता अवतारा: सम्भवन्ति । तेषु अवतारेषु विष्णो एते दशावताराः महत्त्वपूर्णाः प्रामाणिकाश्च सन्ति ।

**सारांशः**

भरतवंशस्यावतंसः विचित्रवीर्यः यक्ष्मणाग्रस्तः सन् स्वर्गं गतवान् । ततो व्यासात् अम्बिकायाः धृतराष्ट्रः अम्बालिकाया च पण्डु अजायताम् । धृतराष्ट्रस्य गान्धार्यायाः शतपुत्राः अभवन् । युधिष्ठिर-भीम-अर्जुन-नकुल-सहदेवेषु केवलं सहदेवः पण्डोः पुत्र आसीत् । ततो राज्यार्थं धृतराष्ट्रपुत्रो दुर्योधनः पाण्डवान् घातयितुं वारम्बारं चक्रान्तं कृतवान् । अवशेषे कौरव-पाण्डवयोः युद्धमभूत् । तस्मिन् महासंग्रामे सर्वे निहता अभवन् । कौरवाः विनष्टा अभवन् । कृष्णकृपया पाण्डववंशे परीक्षित् जीवित आसीत् । अन्ते परीक्षितपुत्रः जनमेजयः राज्यं चकार ।

## आदर्शप्रश्नाः

**लघूत्तरीयाः प्रश्नाः—**

१. बुद्धावतारं लिखत ।

२. कल्क्यवतारकथां निरूपयत ।

३. युधिष्ठिरादीनां महाप्रस्थानं वर्णयत ।

४. राज्यार्थं दुर्योधनस्य चक्रान्तं लिखत ।

**विश्लेषणात्मकाःप्रश्नाः—**

१. अनिरुद्धोपाख्यानं विशदयत ।

२. भरतवंशं निरूपयत ।

३. कुरुपाण्डवयोः युद्धोद्यमं लिखत ।

**निबन्धात्मकाः प्रश्नाः—**

१. पठितग्रन्थदिशा महाभारतसंग्रामं विशदयत ।

२. अग्निपुराणानुसारं पाण्डवानां महत्त्वं समुपस्थापयत ।

३. दुर्योधनस्य चरित्रं चित्रयत ।

**एकाङ्कप्रश्नाः—**

१. शान्तनुसत्यवत्योः पुत्रौ कौ ?

२. व्यासात् अम्बिकायाः कोऽभूत् ?

३. कुन्त्यां वायुदेवात् कोऽजायत ?

४. अग्नये खाण्डवं कः समर्पितवान् ?

५. धर्मराजस्य युद्धबलं कति ?

६. श्रीकृष्णः पाण्डवान् निमित्तीकृत्य किमकरोत् ?

७. भूसूच्यग्रं विनायुद्धं न दास्यामि- कस्येयमुक्तिः ?

८. प्रथमदिवसे दुर्योधनसेनायाः सेनापतिः कः आसीत् ?

९. श्रीकृष्णः कं राज्ये अभ्यषेचयत् ?

१०. के वेदधर्मविवर्जिताः ?

११. कदा सर्वे सङ्कराः भविष्यन्ति ?

१२. कः चातुर्वर्ण्ये यथोचितां मर्यादां स्थापयिष्यति ?

**उत्तराणि–**

१. चित्राङ्गदविचित्रवीर्यौ
२. धृतराष्ट्रः
३. भीमसेनः
४. अर्जुनः
५. सप्ताक्षौहिणी
६. दुष्टविनाशनम्
७. दुर्योधनस्य
८. भीष्मः
९. वज्रम्
१०. पाखण्डिनः
११. कलियुगान्ते
१२. कल्किः ।

—०—

## पञ्चमोऽंशः

**प्रस्तावना—**

अग्निपुराणस्य अस्मिन् अंशे सर्गविषये वर्णितमस्ति । सर्गवर्णनायां कश्यपवंशवर्णनं स्वायम्भुववंशस्येतिवृत्तं प्राधान्येन वर्णितं विद्यते । अग्निुराणे सर्गस्य प्रतिपादनम् अतीव सरलं स्पष्टञ्च प्रतीयते । मन्वन्तरानुसारं प्रतिसर्गस्य वर्णनं प्रदत्तं विद्यते । श्रेष्ठत्वप्रतिपादनप्रसङ्गे श्रीमद्भगवद्गीतायाः विभूतियोगस्य वर्णनसादृश्यं परिलक्ष्यते । सर्गभेदश्च अस्मिन् अंशे सुष्ठुतया निरूपितो वर्त्तते ।

**उद्देश्यम्—**

प्रिय पाठकाः, अग्निपुराणस्यास्मिन् अंशे वयम् एतान् विन्दून् आलोचयिष्यामः ।

* सृष्टिप्रक्रिया ।
* कश्यपवंशवर्णनम् ।
* स्वायम्भुववंशस्येतिवृत्तम् ।
* श्रेष्ठत्वनिरूपणम् ।
* सर्गवर्णनम् ।
* सर्गभेदः ।

**सृष्टिप्रक्रिया—**

सृष्ट्यादौ खं रात्रिदिनादिकं किञ्चिदपि नासीत् । तदा केवलं ब्रह्मैव आसीत् । सर्गकाले ब्रह्मो व्यक्तमभूत्, पुनश्च विष्णुरूपेण स प्रकृतिपुरुषौ क्षोभयामास । ततो महत्तत्वमभवत् । तस्मात् वैकारिकस्तैजस्तामसश्चाहंकारा अभवन् । तामसिकादहंकारात् पञ्चतन्मात्राणि तथा पञ्च महाभूतानि अभवन् । शब्दतन्मात्रतः आकाशोऽभूत् । तस्मात् स्पर्शस्तस्माच्च अनिलोऽभूत् । अनिलात् रूपतन्मात्रमभूत् । रूपात् अनलः सम्भूतोऽभूत् । ततो रसतन्मात्रम् । रसादापः । ततो गन्धः । गन्धमात्रा च महीस्मृता । एते तामसादहंकारादजायन्त । तैजसादहंकारात् इन्द्रियाणि जज्ञिरे । वैकारिकादहंकारात् दशेन्द्रियाणामधिष्ठातृदेवाः मनश्च बभूवुः । ततः स्वयम्भूर्भगवान् विविधाः प्रजाः ससर्ज । ब्रह्मा आदौ आपो ससर्ज । तासु वीर्यमसृजत् । तद्

हिरण्यवर्णमण्डमभवत् । तस्मिन् अण्डे स्वयं ब्रह्मा जज्ञे । तस्मात् स स्वयम्भूरिति हिरण्यगर्भश्चेति कथितः । हिरण्यगर्भः परिवत्सरमुषित्वा तदण्डं द्विधा विभज्य दिवं भुवं च चकार । तयोः शकलयोः मध्ये प्रभुः आकाशमसृजत् । अप्सु परिप्लवां पृथ्वीं चकार । दिशश्च दशधा दधे । तत्र कालं मनो वाचं क्रोधम् अथ रतिं च ससर्ज । सृष्टिं स्रष्टुमिच्छन् प्रजापतिः विद्युतोऽशनिमेघान् रोहितेन्द्रधनूंषि च सृष्टवान् । आदौ वयांसि अथ वक्त्रतः पर्जन्यञ्च ससर्ज । यज्ञसिद्धये ऋचो यजूंषि सामानि च निर्ममे । भुजात् भूतमुच्चावचं चकार । सनत्कुमारं, क्रोधसम्भवं रुद्रञ्च ससर्ज । मरीचिमङ्गिरसं पुलस्त्यं पुलहं क्रतुं वसिष्ठं चैतानि सप्तब्रह्मणः ससर्ज । एते सप्तर्षयः रुद्राश्च प्रजाः जनयन्ति । ब्रह्म आत्मनं द्विधा कृत्वा अर्द्धेन पुरुष, अर्द्धेन च नारी अभूत् । अर्द्धेन या नारी सा शतरूपा आसीत् ।  तस्यां स्वायम्भुवो मनुः प्रजाः जनयामास ।

**बोधप्रश्नः—**

१. अहंकाराः कतिविधाः ?

२. ब्रह्मा आदौ किं ससर्ज ?

**स्वायम्भुववंशः—**

स्वायम्भुवमनोः सुतौ प्रियव्रतोत्तानपादौ अभवताम् । सद्रूपां कन्यां काम्याञ्च स अजीजनत् । सुरुच्यामुत्तानपादस्य उत्तमो जज्ञे । सुनीत्यान्तु ध्रुवोऽजायत । ध्रुवः कीर्तये दिव्यानि त्रीणि सहस्राणि वर्षाणि तपस्तेपे । प्रीतः हरिः तस्मै सप्तर्षिणामुपरि स्थानं ददौ । तस्य वृद्धिं दृष्ट्वा उषना इमं श्लोकं पपाठ–

अहोऽस्य तपसो वीर्यमहो श्रुतमहोद्भुतम् ।
यमद्य पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः ।। (अ.पु. १८/५)

ध्रुवात् शिष्टिः भव्यः शम्भुश्च अजायन्त । शिष्टेः सुच्छायायां पञ्चाऽकल्मषाः पुत्रा अभवन् । ते रिपुः, रिपुञ्जयः, रिप्रः, वृकलः वृकतेजाश्चेत्यासन् । रिपोः पत्नी बृहती सर्वतेजसं चाक्षुषं मनुमजीजनत् । तस्य मनोः नड्वलायां ऊरुः, पुरुः, शतद्युम्नः, तपस्वी, सत्यवाक्, कविः, अग्निष्टुः, अतिरात्रः सुद्युम्नः अभिमन्युकश्चेते दशपुत्रा अभवन् । उरोः षडाग्नेयी महाप्रभान् पुत्रानजनयत् । ते यथा- अङ्गः सुमनसः, स्वातिः, क्रतुः अङ्गिरसश्च । अङ्गात् सुनीथा एकमपत्यं

वेनं जनयामास । पापरतः स वेनः मुनिभिः कुशे हतोऽभूत् । प्रजार्थम् ऋषयः अनपत्यस्य वेनस्य दक्षिणं करं ममन्थुः । वेनस्य मथिते पाणौ नृपः पृथुः सम्बभूव । तं दृष्ट्वा मुनयः कथितवन्तः यत् एषः महातेजाः प्रजाः मुदिताः करिष्यति । अनेन महत् यशः प्राप्स्यते । मुनीनां वचनानुसारंस पृथुः धन्वी कवची च जातः । तेजसा निर्दहन्निव स वैन्यः पृथुः सर्वाः प्रजाः ररक्ष । राजसूयेनाषिक्तो पृथुः आद्य पृथिवीपतिः बभूव । तस्याग्निकुण्डात् निपुणौ सूतमागधौ अजायताम् । तौ नानाभावेन पृथोः स्तुतिं चक्रतुः । प्रजारञ्जनात् पृथुः प्रथमराजा अभूत् । प्रजानां जीवनाय शस्यार्थं तेन पृथ्वी दुग्धा अभूत् । वैन सह पृथ्वी देवैर्मुनिगणैर्गन्धर्वैः साप्सरोगणैः पितृभिर्द्दानवैः सर्पैर्वीरुद्भिः पर्वतैर्जनैश्च दुह्यमाना वसुन्धरा ईप्सितं शस्यादिकमददात् । तेन जीवाः प्राणानधारयन् । पृथोः पुत्रौ अन्तर्द्धिपालिनौ अजायताम् । शिखण्डिनी हविर्द्धानमन्तर्द्धानात् प्रस्तूतवती । हविर्द्धानात् षडाग्नेयी धीषणा प्राचीनवर्हिषं शुक्रं गयं कृष्णम् अजनयत् । प्राचीनवर्हिषः सवर्णायां दश पुत्रा अभवन् । सर्वे प्रचेतसो धनुर्वेदस्य पारगाः अभवन् । ते सर्वे दशसहस्रवर्षाणि समुद्रसलिले तपः तप्त्वा प्रजापतित्वं प्राप्तवन्तः । जलात् बहिरागस्य तरुभिः खं भुवञ्च व्याप्तं दृष्ट्वा ते मुखजाग्निनाद्रुमक्षयं चक्रुः । राजा सोमः तान् प्रजापतीन् उपगम्य कोपं शान्तयितुं कथितवान् । तेनोक्तं यत् 'कोपं शान्तं कुरुत, प्रम्लोचायाः कण्डोः मुनेश्च कन्यां मारिषां विवाहं कुरुत, अस्यां दक्ष उत्पत्स्यते, स च प्रजाः संवर्द्धयिष्यति' । सोमस्य वचनानुसारेण प्रचेतसः कुलङ्करीं कन्यां मारीषां जगृहुः । अस्याः दक्ष अभवत् । स दक्षः मनसा चराम् अचरां द्विपदोऽथ चतुष्पदः सृष्ट्वा पश्चात् स्त्रिय असृजत । स च दक्षः तासु कन्यासु दश धर्माय त्रयोदशकश्यपाय सप्तविंशतिः सोमाय चतस्रोऽरिष्टनेमिने द्वे बहुपुत्राय द्वे चैवाङ्गिरसे अददात् । तासु विश्वायाः विश्वदेवाः साध्यायाः साध्याः अजायन् । मरुत्वत्या मरुत्वन्तो वसोः वसवोऽभवन् । भानोः पुत्राः भानवः मुहूर्त्तायाः मुहूर्तजा अभवन् । सम्बाया धर्मतः घोषो नागवीथी यामिजा च अभवन् । अरुन्धत्यां सर्वं पृथिवीविषयं व्यजायत । सङ्कल्पायास्तु इन्दोः नक्षत्रत आपो ध्रुवः सोमः, धर, अनिलोनलः, प्रत्यूषः प्रभावः एते अष्टवसव अजायन् । आपस्य पुत्रो वैतण्ड्यः श्रमः शान्तः तथा मुनिरभवन् । ध्रुवस्य व्यालो लोकान्तः च सुतौ अभवताम् । सोमस्य सुतः वर्च्याः । धरस्य पुत्रः द्रविणः तथा हुतहव्यः । मनोहरायाः शिशिरः प्राणः तथा रमणः पुत्रा आसन् । अनिलस्य पुत्रः पुरोजव आसीत् । अनलस्य पुत्रः विज्ञातः । अग्निपुत्रः कुमारः शरस्तम्बे व्यजायत । तस्य शाखो विशाखः नैगमेयः पुष्ठजः अभवन् । कृत्तिकातः कार्त्तिकेयो यतिः सनत्कुमारकश्चेति पुत्रा अजायन्त । प्रत्यूषाद्देवलो जज्ञे । प्रभावतः नैगमेयोऽजायत । सुरभी कश्यपात् एकादशरुद्रान्

विजज्ञुषी । एकादशरुद्राणां पुत्रैः सचराचरं जगत् परिव्याप्तमस्ति ।

**बोधप्रश्नः—**

१. स्वायम्भुवमनोः कति पुत्राः आसन्?

२. ध्रुवः कः ? तस्य स्थानं कुत्र वर्त्तते ?

**श्रेष्ठत्वनिरूपणम्—**

द्विजौषधीनां पतिश्चन्द्रोऽस्ति । अपां पतिः नृपः वरुणः । राज्ञां राजा वैश्रवणोऽस्ति । सूर्याणामीश्वरः भवति विष्णुः । वसूनां राजा पावकः । मरुतां प्रभुः वासवः । प्रजापतीनां पतिः दक्षः । दानवाधिपः प्रह्लादः कथितः । पितृणां राजा यमः । भूतादीनां प्रभुः हरः । शैलानां मध्ये हिमालयः श्रेष्ठः । नदीनां प्रभुः सागरः । गन्धर्वाणां पतिः चित्ररथः । नागानां राजा वासुकिः । सर्पाणां राजा तक्षकोऽस्ति । पक्षिणां पतिः गरुडः । गजेन्द्राणां मध्ये श्रेष्ठः ऐरावतः । गवां मध्ये गोवृषः श्रेष्ठः । मृगाणां राजा शार्दूलः । प्लक्षो वनस्पतीश्वरः कथितः । अश्वानां मध्ये उच्चैश्रवाः श्रेष्ठः । सुधन्वा पूर्वपालकः । दक्षिणपालकः शङ्खपदः । जले पालकः केतुमान् । सौम्ये हिरण्यरोमकः पालकः कल्पितः ।

**सर्गवैविध्यम्—**

सृष्ट्यादौ प्रथमतः महतः सर्गोऽभूत् । महतः सर्गः ब्रह्मणः सर्गः कथितः । तन्मात्राणां सर्गः द्वितीयः । स च सर्गे भूतसर्गः कथितः । वैकारिकसर्गः तृतीयः सर्गः । स च ऐन्द्रियकः स्मृतः । इत्येषः प्राकृतः सर्गे बुद्धिपूर्वकः सम्भूतः । चतुर्थः सर्गे मुख्यः सर्गः । तत्तु स्थावरात्मकः । तिर्यक्स्रोतसां सर्गः पञ्चमः सर्गः । ऊर्ध्वस्रोतसां सर्गः देवसर्गः षष्ठसर्गः । ततोऽर्वाक् स्रोतसां सर्गः मानुषः सर्गः । तत्तु सप्तमः सर्गः कथितः । अष्टमोऽनुग्रहः सर्गः । पञ्चैते वैकृताः सर्गाः, त्रयश्च प्राकृताः स्मृताः । नवमः कौमारसर्गः स्मृतः । इत्थं ब्रह्मतो जगतो मूलहेतवः नवसर्गाः प्रादुर्भूता अभवन् ।

**सर्गभेदः—**

सर्गः त्रिविधः । प्राकृतिकः सर्गः, नित्यसर्गः, नैमित्तिकः सर्गश्च । मन्वन्तरप्रलयादनु प्राकृतसर्गः प्रचलितो भवति । अनुदिनं यत् जायते तद् नित्यसर्गः कथ्यते । अग्निपुराणे

नैमित्तिकसर्गवर्णने वर्णितं यत् चाक्षुषमन्वन्तरवत् वैवश्वतमन्वन्तरे च ब्रह्मतः दक्षोऽजायत । ख्यात्याद्याः दक्षकन्याः भृग्वाद्यान् उपयेमिरे । भृगोः ख्यातिः देवौ धाताविधातारौ प्रसूतवती । तस्यां विष्णोः पत्नी लक्ष्मी अजायत । धातुः पुत्रः प्राणः तथा विधातुः पुत्रः मृकण्डु अभवताम् । मृकण्डोः मार्कण्डेयोऽजायत । ततो वेदशिरा जज्ञे । मरीचेः सम्भूत्यां पौर्णमासोऽभूत् । स्मृत्यामङ्गिरसः सिनीवाली कुहूः राका तथा अनुमतिरभवन् । अत्रेरनसूया सोमं, दुर्वाससं, योगिनं पुत्तं दत्तात्रेयञ्च अजीजनत् । प्रीत्यां पुलहस्य सुतः दत्तोलिः अभवत् । पुलहात् क्षमायां सहिष्णुः कर्मपादिकाः जाताः । सन्नत्यां क्रतोः षष्टिसहस्राणि बालखिल्या अभवन् । वशिष्ठस्य उर्जायां राजा गात्र ऊर्ध्वबाहुकः सवनः लघुः शुक्रः सुतपश्चेति सप्तर्षयोऽभवन् । पावकः पवमानः शुचिः स्वाहाग्निजोभवत् । स्वधायां पितृभ्यः मेना धारिणी सुते अजायताम् । अधर्मस्य भार्या हिंसा अनृतं प्रसूतवती । तयोः कन्या च निकृतिः आसीत् । ताभ्यां भयनरकौ अजायताम् । तथा च मिथुनं मायां वेदनां च अजायताम् । वेदना रौरवात् दुःखं प्रसूतवती । मृत्योः व्याधिजराशोकतृष्णा च क्रोधात् जज्ञिरे । ब्रह्मणः रोदनात् रुद्रोऽजायत । दक्षकोपात् तस्य रुद्रस्य भार्या देहं त्यक्त्वा हिमवत्दुहिता भूत्वा पुनः शम्भोः पत्नी अभूत् ।

**बोधप्रश्नः—**

१. ख्यातिः कस्य पत्नी अभवत् ?

२. दक्षस्य कन्या सती देहं त्यक्त्वा कस्य कन्या अभवत् ?

**कश्यपवंशवर्णनम्—**

चाक्षुषमन्वन्तरे तुषिता देवाः पुनः वैवस्वतमन्वन्तरे अदित्यां कश्यपात् च अजायत । ते यथा- विष्णुः, शक्रः, त्वष्टा, धाता, अर्यमा, पूषा, विवस्वान्, सविता, मित्रः वरुणः भगः तथा अंशुः । एते द्वादशादित्या आसन् । कश्यपात् दित्यां हिरण्यकशिपुः तथा हिरण्याक्ष अभवताम् । कन्या च सिंहिका अभवत् । सिंहिकायाः विप्राचित्तेः राहुप्रभृतयः अभवन् । हिरण्यकशिपोः अनुह्लादः, ह्लादः, प्रह्लादः, संह्लादश्चेति चत्वारः पुत्रा अभवन् । ह्लादस्य आयुष्मान्, शिविर्वाष्कल च पुत्रा आसन् । प्रह्लादस्य पुत्रः विरोचनः । तत्पुत्रः बलिः । बलेः शतपुत्रा आसन् । तेषु बाणासुरः ज्येष्ठ आसीत् । हिरण्याक्षस्य पञ्चसुता आसन् । शम्बरः शकुनिः, द्विमूर्द्धा, शङ्कुः आर्यश्चेति । दनोः शतं सुताः दानवाः आसन् । स्वर्भानोः कन्या प्रभा आसीत् । पुलोम्नः कन्या शची कथिता । वृषपर्वणः कन्या शर्मिष्ठा अभवत् । तथा च हयशिरा कन्या

उपदानवी आसीत् । पुलोमा तथा कालका उभे वैश्वानरसुते आस्ताम् । प्रह्लादस्य कुले चतुष्कोट्यो निवातकवचा अभवन् । तम्रायाः षट् सुताः काकी, श्येनी, भाषि, गृध्रिका, शुचि, सुग्रीवा च आसन् । ताभ्यः काकादयोऽभवन् । विनताया अरुणः तथा गरुडः अभवताम् । शेषवासुकितक्षकादयः सहस्रन्तु काद्रवेयाः सन्ति । सर्पाः सुरसाभवाः सन्ति दंष्ट्रिणः क्रोधवशजा पक्षिणो धरोत्थाः सन्ति । सुरम्यां गोमहिष्यादयोऽजायन्त । तृणादयः इरोत्पन्नाः सन्ति । रवसायां यक्षरक्षांसि अजायन्त । मुनेः अप्सरसो भवन् । अरिष्टायाः गन्धर्वा अजायन्त एतेषां पुत्रादयो असंख्याः सन्ति ।

**बोधप्रश्नः—**

१. चाक्षुषमन्वन्तरे द्वादशादित्याः के आसन् ?

२. सिंहिका कस्याः कन्या आसीत् ?

**सारांशः**

सृष्टेः प्राग् आकाशादिकं किञ्चिदपि नासीत् । तदा ब्रह्म अव्यक्तरूपेणासीत् । सर्गकाले अव्यक्तं ब्रह्म प्रकृतिपुरुषरूपेण व्यक्तमभूत् । ततो महतत्त्वाहंकारादयोऽजायन्त । आदौ ब्रह्म आपः ससर्ज । तासु वीर्यमसृजत । तद्वीर्यं हिरण्यवर्णमण्डमभवत् । तस्मिन् अण्डे स्वयं ब्रह्मा यज्ञे । स हिरण्यगर्भः ब्रह्मा तदण्डं दिवं भुवं चेति द्विधा चकार । तयोः मध्ये आकाशमसृजत् । अप्सुपरिप्लवां पृथ्वीं चकार । तत्र विविधाः प्रजाः ससर्ज । तेन मनसा निर्मिताः प्रजाः वृद्धिं न प्राप्तवत्यः । अतः स आत्मानं द्विधा चकार । स्त्र्यंशात् देवी शतरूपा तथा पुरुषांऽशात् स्वायंभुवः मनुः अजायताम् । तयोः प्रियव्रतोत्तानपादौ पुत्रौ आस्ताम् । उत्तानपादस्य पुत्रौ ध्रुवः उत्तमौ आस्ताम् । ध्रुवस्य त्रयः पुत्राः आसन् । तेषां बहवः पुत्रपौत्रादयोऽभवन् । तथा च कश्यपस्य अदितिगर्भात् आदित्याः दितिगर्भात् दैत्याः, दनोः गर्भात् दानवाः ताम्रागर्भात् काकादयः, विनतागर्भात् अरुणगरुडौ, कद्रुगर्भात् शेषवासुकितक्षकादयः, सुरसागर्भात् सर्पाः, सुरभ्यां गोमहिषादयोऽजायन्त । अन्ये च दंष्ट्रिणः पक्षिणः यक्षरक्षांसि ते सर्वे कश्यपवंशधराः सन्ति । एवं क्रमेण प्रलयादनु प्रतिमन्वन्तरेषु सृष्टिक्रमः प्रचलति ।

## आदर्शप्रश्नाः

**लघूत्तरीयाः प्रश्नाः—**

१. पठितग्रन्थानुसारं सर्गवैविध्यं निरूपयत ।

२. पठितग्रन्थदिशा श्रेष्ठत्वं निरूपयत ।

**विश्लेषणात्मकाः प्रश्नाः—**

१. पठितग्रन्थदिशा सृष्टिप्रक्रियां विवेचयत ।

२. अग्निपुराणे प्रतिपादितं सर्गभेदं लिखत ।

**निबन्धात्मकाः प्रश्नाः—**

१. स्वावम्भुववंशं वर्णयत ।

२. अग्निपुराणानुसारं कश्यपवंशं विशदयत ।

**एकाङ्कप्रश्नाः—**

१. राजसूयाभिसिक्तानामाद्यः कः ?

२. पृथुचक्रवर्तिनः पुत्रौ कौ ?

३. धिषणाहविर्धानयोः कति पुत्राः ?

४. प्रम्लोयायाः पिता कः ?

५. सुरभी कश्यपात् कान् विजज्ञुषी ?

६. सैंहिकेयः कः ?

७. बलिपुत्रेषु ज्येष्ठः कः ?

८. अधर्मस्य भार्या का ?

९. मृत्योः सन्ततयः के ?

१०. अधर्महिंसयोः पुत्री का ?

११. विरोचनस्य पुत्रः कः ?

१२. दितिकश्यपयोः पुत्री का ?

**उत्तराणि—**

१. पृथु, २. अन्तर्द्विपालिनौ, ३. षट्, ४. कण्डुमुनिः, ५. गोमहिष्यादीन्, ६. राहुः, ७. बाणः, ८. हिंसा, ९. व्याधिः, जरा, शोकः, तृष्णा च, १०. निकृतिः, ११. बलिः, १२. सिंहिका ।

—०—